CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 549

Title kāśikā vivaraṇa pañjikā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 549 Subject: Grammar.

Title: Kāśikā vivaraṇa pañjikā

Author: Jinendrabuddhipāda Scribe: Bhaṭa Jīvaṇa

Date of the work: — Date of the Ms.: V.S. १७८६

Place of the work: — Place of the Ms.: —

Size: 9.5" by 4.2" Extent: 41 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: —

श्रीगोपीजनवल्लभोजयति॥ ॥श्रीलक्ष्म्यायनमः॥ ॥युष्म॥ ॥वैषम्याद्यथासंख्यंनभवतीति॥द्वेहिप्र
कृतिप्रत्ययास्तुत्रयइतिवैषम्यं।ननुचखण्डावेवनेवानेनविधीयेते।अणप्रत्ययस्त्वन्यतरस्यांग्रहणेनय
थाप्राप्तस्याभ्यनुज्ञानेकृतेस्वसामर्थ्यादेवभवति।तत्कृतोवैषम्यंकोपितर्हिनैवानेनविधीयेते।तस्या
पिहिचकारोभ्यनुज्ञापकएव।सोपिस्वशास्त्रादेवहृद्युछइत्येतस्माद्भवतीति।एवमपिवैषम्यंसर्वथाना
स्तियथासंख्यप्रसंगः॥ ॥तस्मिन्॥ ॥तस्मिन्नितिसाक्षाद्विहितःखञ्छश्रिर्दिश्यतइति।तस्मिन्नित्युक्तेग्रहणे
वतत्रैवप्रतीत्युत्पन्नेः॥तत्रपुनःकरणसामर्थ्याद्विहितत्वं।आनंतर्यञ्चखञः।तस्यनिर्देशोपुक्तः।ननुचपूर्वेस
त्रेखश्चेतिचकारेणकोनलभ्यते।वाचकत्वेशब्दस्यवाच्यइति।खञश्छएवानंतरोभवति।स्यादनंतरोयदिचका
रस्तस्यवाचकःस्यात्॥नवासौतस्यवाचकः।सहिसमिपवर्तिनःपदांतस्यसहायतामात्रमाचष्टे।खञःस
हायतामाख्यायनिवृत्तेचकारेसासहायताप्रकरणाक्तेनैवविज्ञायते।तस्मात्चकारःकस्यवाचकोन
भवति।नासौतः।तत्स्तस्यानंतर्यंनिमित्तयोनित्यादि।द्वेहिनिमित्तेखञणो।निमित्तिनावपिद्वौवे

ततःसमानत्वाद्यथासंख्येनात्रभवितव्यमितिमन्यमानस्यप्रश्नः।योगविभागइत्यादि।युष्मदीयोस्मदी
यमिति।यदितस्मिन्नणिचेतिनोच्यते॥ततोयथापूर्वसूत्रविहितयोःखञणोरिमावादेशौभवतः।तथाके
पिस्यातांतस्मिंस्तुसतिनभवतः॥ ॥तवक॥ ॥पूर्वेणयुष्माकास्माकयोःप्राप्तयोःप्रत्ययोत्तरपदयो
श्चेतिचत्वमयोरेकवचनेनवकममकावादेशौविधीयेते।एकवचनपरयोरिति।एकवचनंपरंयाभ्यांते
तयोक्ते।निमित्तयोस्त्वीत्यादि।यथापूर्वएवविस्तरेयोगविभागानिमित्तयोरादेशौप्रतियथासंख्यंनभ
वति।नचेहापिनभविष्यति।तस्यचयथासंख्याभावस्यापूर्वएवयोगविभागोदीर्हितेनहिपूर्वत्रनिमित्ते
निवृत्तयथासंख्येकृतेनस्मादिहाप्यनुवर्तमानेतेनिवृत्तयथासंख्येएवानुवर्तेते।अजत्वमत्वादधिकारणां
तस्मादिहापिपूर्वकायोगविभागाद्यथासंख्याभावः।इहसर्वविधिभ्योलुग्विधिर्बलवानिति।एकवच
नस्यलुकिकृतेयुष्मदस्मदोरेकवचनपरतानसंभवतीति।प्रत्ययलोपलक्षणेनसमर्पयितव्या।तदपिप्र
त्ययलोपलक्षणंप्रतिषेधितुमाह।नलुचेत्यादि।वचनादित्यादि।यदिहिप्रत्ययलोपलक्षणंनस्यात्।इदंवच

नमपार्थकं स्यादित्यभिप्रायः॥ ननु चयस्यैकवचनपरता संभवति। विशेषणार्थमेकवचनं स्यात्। तस्यै
कवचनपरता संभवति। निमित्तस्य स्वजादेः॥ निमित्तेनैकवचनपरत्वेन विशेष्यमाणे सती हे बस्यात्॥
योष्माकः पुत्रः आस्माकः पुत्रः॥ इति। अत्र ह्येकवचनपरं तेन तद्धितस्योपपद्यते। बहुवचनस्यातं। तावकाः॥
पुत्रा मामकाः पुत्रा इति। न त्वत्र नित्यस्यैकवचनपरता संभवतीति। नेतदस्ति। युष्मदस्मदी त्वर्थमत्रे विशे
षिते। तथा हि। स्वजाद्यनिच्च परतो युष्मदस्मदोरिति स्वजप्परतयाते एव युष्मदस्मदी विशेष्येते। न दिहा
पितथात्वतेएवानुवर्त्तते॥ अजहद्धर्मत्वादनामिति। तयोरेवैकवचनपरत्वं विशेषणमुक्तम्॥ अथवा तवै
कममकयोर्विधेयत्वेन प्राधान्यात् तयोरेवैतद्विशेषणं युक्तम्। तयोरेव तद्विशेषणं भवतस्तानिद्वारकमेव
भवति। यदि स्थानिनोरेकवचनपरता एवमादेशौ स्थानिवद्भावेनैकवचनपरो भवतस्तदनेनापि प्रकारेण यु
ष्मदस्मदोरेवैकवचनं विशेषणं युक्तं॥ ननु कथं चिन्निमित्तस्य स्वजादेः। अथवेत्यादि। सर्वं परिभाषिक
मेकवचनमाश्रीत्य व्याख्यानं। इदानीं त्वन्वर्थमाश्रित्य व्याख्येष्टे॥ एकोर्थ उच्यते। येन तदेकवचनं। अत्र उग

ख्याने एकवचन इति नेदं समस्यैकवचनं। किंतर्हि प्रथमाद्विवचनांतं॥ ॥परावर॥ ॥अयमनवताप्रातिप-
केन नदंतविधिर्नास्तीति प्रतिषेधात्सर्वेण प्राप्तेनयमारंभः। तत्राधमोत्तमशब्दौ निंदाप्रशंसावचनौ। न
त्सर्वादिने प्राप्तेसत्यमारंभः। परावरशब्दौ यावद्दिक्छब्दौ तत्सर्वादिष्वन्येव यो उदिक्छब्दौ सर्वाडुत्तरस्त्रेणह
न्नियत्विच। कथं पुनः परावराधमेभ्यः इत्युच्यमाने परावरादिसर्वतात्राक्या विज्ञायतेमित्याह। अद्यदितिवक्ष्यति
इत्यादि। इह हि सर्वसत्त्वादद्यादित्यनुवर्त्तते। तत्र परावराधमोत्तमेभ्यः परो यो ड्शब्दस्तस्यैवं विशेष्यमाणे
अर्द्धशब्दे सामर्थ्यादेव तस्य परावरादिसर्वता जिज्ञास्यते। तत्किं सर्वग्रहणेन। तत्रापि परावरयोः नदीछब्द
योः परेनेति। उत्तरसूत्रेणाच्छत्रयतोस्यातामिति। यदि सर्वग्रहणं न क्रियेतेत्यभिप्रायः। अस्मादित्यादि। परा
वरादिसर्वयदेव यथा स्यादित्येतदेव हि तत्सर्वग्रहणस्य प्रयोजनम्। तेन हि सर्वकार्यं भवति। नपरमित्येषो
र्थः स्यात्॥ तस्मात्सर्वग्रहणादिक्छब्दपदेपि परावरं सर्वाद्यदेव भवति॥ ॥दिक्॥ ॥सर्वाद्यत्र सर्वादेकमि
ति। सर्वस्मिन्नर्द्धे जातः। तद्धितार्थ इत्यादिना समासः। ततस्तद्धितः। अपपदग्रहणं किमर्थं। न दिक्सर्वादित्ये

वोच्येदित्यादा।पदग्रहणमित्यादि।असतिहिपदग्रहणेस्वरूपविधिःस्यात्।ततश्चदिगर्हीयात्इत्यत्रैवस्या
त्।पदग्रहणेसतियत्नामिकिंचिद्दिग्संबंधिशब्दवर्यैदंतस्यग्रहणंमुपपन्नंभवति॥ ॥ग्रामात्॥ ॥यतोग्र
चावाचिति॥पूर्वेणग्रामस्यायोर्वा अर्द्धइति।पूर्ववत्समासः।नेत्वत्रपूर्वस्मिन्नर्द्धे ग्रामस्येतिग्रामापेक्षमा
णस्यार्द्धशब्दस्यासामर्थ्यात्समासोनोपपद्यते।नैषदोषः।प्रधानमत्रार्द्धंभवति।प्रधानस्यसापेक्षस्या
पिसमासइत्येतदुपमितंव्याघ्रादिभिःसामान्याप्रयोगइत्यत्रज्ञापितं॥ ॥मध्यात्॥ ॥मध्यात्राक्षेयो
गहादिषष्ठ्यंतेवामध्यवचनोमध्यम ध्यमश्चाचरणइतिपठ्यते।तथाहिप्रयोगोदृश्यते।नावाद्यंग्रामम्मि
त्येवंतत्सूत्रस एवविधिर्भवति।यस्त्वन्यस्तस्यग्रहणंनवेदितव्यम्॥ ॥असाम्प्रतिके॥ ॥नाम्प्रयुक्तमि
त्यादिभिःपर्यायैःसांप्रतिशब्दस्यार्थमाचष्टे।सांप्रतिकंन्याय्यमुच्यते।तथाहिप्रयोगोदृश्यते।नावास्यंश्रा
द्धमित्येवं प्रवर्त्तेतव्यमसांप्रतिमिति।अत्रन्याय्यप्रतिषेधःप्रतीयते।सांप्रतमेवसांप्रतिकं।विनयादेर्वा
तिग्रहणाद्विनयादिस्मश्चेतिठक्॥ ॥द्वीप॥ ॥अनुसमुद्रमिति।समुद्रंसमया अनुसमुद्रं।अनुर्यत्स

मयेत्यव्ययीभावः।अणोमनुष्यवुञश्चापवादइति।कच्छादिभ्यश्चेतिप्राप्तस्याणःमनुष्यतत्स्थयोर्वुञ्।ते
त्रस्यवुञ्॥ ॥कालात्॥ ॥कालविशेषवाचिनइत्यनेनकालादित्यर्थग्रहणंनस्वरूपस्येति।यदिहिस्व
रूपग्रहणंनस्यात्।संधिवेलादिसूत्रेणैवाविधानकमनर्थकंस्यात्।प्रावृषेण्यतो।नित्याननेवसिद्धत्वा
त्।इहत्वर्थग्रहणे— बाधनार्थत्वात्तस्यनानर्थक्यंभवति।तस्मादर्थग्रहणमेतत्।इहकेचिद्दृष्टामुपस
याद्रत्याकालेवर्त्तंते।मासार्द्धमासइति।केचिद्गौणपावृत्त्याकदंबपुष्पसाहचर्यात्कालःकदंबपुष्प्या
व्रीहिकालानसाहचर्यात्कालोव्रीहिपाकमिति।तेषामिहोभयेषामपिग्रहणमतएवाह।यथाकथंचि
दिति।येनकेनप्रकारेणेत्यर्थः।गुणाद्वृत्त्यापीति।अनेनयथाकथंचिदित्यस्यार्थंविस्पष्टीकरोति।उ
पचारिकीवृत्तिरित्यर्थः।अपिशब्दान्मुख्ययापिवृत्त्यानतुचमुख्येसतिगौणस्याग्रहणमयुक्तं।गौण
मुख्ययोर्मुख्येकार्यसंप्रत्ययात्।नैषदोषः।आचार्यप्रवृत्तिर्ज्ञापयतिगौणस्यापिकालस्यग्रहणमि
ति।पादयंसंधिवेलादिसूत्रेप्रवृत्तेनेनकालग्रहणेननक्षत्राणिविशिनष्टि।नहिमुख्यार्थःकालोनक्षत्रा

णं विशेषणमुपपद्यते। नेष्टमुख्यस्य कालसंभवात्॥ ॥संध्ये॥ ॥ऋत्वणोऽपवाद इति। संधिवेलादिसूत्रे
ण प्राप्तस्यासाध इति कर्मण्यापद्यत इति। क्रियाविशेषः कश्चिच्छास्त्रोक्तेन विधिना साध्यः। साधयद्दणोऽ
द्यते। ननु श्रद्धावान् पुरुषः कुत एतत्। तस्य प्रत्ययेनानभिधानात्। शांगरादिकत्वाद्धेन त्वभिधानं त्वा
स्वाभाव्यात्। कर्मण एवाभिधानं पुरुषस्य॥ ॥ऋवसः॥ ॥तस्य चेति ठञ्। कुत एतत्। तस्य विधीयमा
नतया प्राधान्यात्। प्रधानेन च कार्यसंप्रत्ययात्। कर्मण एवाभिधानं। स च वृडागम इकारादेशोऽलोऽन्त्येन भवतीति
वेदितव्यम्॥ ननु संनियोगशिष्टत्वान्नुटस्तेनैव तावद्भवितव्यम्। पश्चादङ्गसंज्ञायामनिर्दिष्टायामि
कादेशेन। नैतदस्ति। उपदेशावस्थायामेव ह्यकादेशेन भवितव्यम्। ज्ञापकात्। तज्जदयं चुञ्छएकविंनि। ति
प्रत्ययस्वरार्थमनुबंधं चकारं करोति। प्रत्ययसंज्ञायाः सन्नियोगाद्धि प्रत्ययस्वरेणैतत्पश्चादिकादेशाद् इ
ति सिद्धमंतोदात्तत्वं। किं चित्करणेन तस्माद्। ज्ञित्करणाद्विज्ञायते। सन्नियोगशिष्टेष्वपि पूर्वमिकादे
शो भवतीति तेन ठग्रहणमंगसंज्ञाकृतानि इकमायबोधयंतीति नुडुपितस्येव भविष्यतीति विज्ञाय

ते। एताभ्यामित्यादि। स्वशब्दोऽयमव्ययं कालवाची तेन यदा ठञ्ञपो न भवतः। न तदा सायंचिरमित्यादि
युटुलावपि न भवतः॥ ॥संधिवेला॥ ॥ठञोऽपवाद इति। कालाट्ठञिति प्राप्तस्य। अथ ग्रहणं किमर्थं। य
थाविहितमेवोच्येत न चैवमुच्यमानेन प्राप्नोतीत्यासंजनीयं यदितः। न स्यात्पुनर्वचनमनर्थकं स्यात्। तस्मा
द्वचनप्रमाणाद्यो विहितो न प्राप्नोति। ठञ्प्रत्ययेन बाधितत्वात्स एव भविष्यति। स वा न चेत्स्यत। आद्दाञ्
एग्रहणमित्यादि। संधिवेलादिषु पौर्णमासीशब्दोऽपठ्यते। स्वातिरिति। नक्षत्रशब्दोऽयं द्वोऽस्ति
ननु यद्यलग्रहणं न क्रियेत तदान्यां परत्वात्। त्राच्छे बाधिते पुनर्वचनादण् एव स्यात्। तस्मात्तमपि वा। द्विता
तद्धादनेवयथा स्यादित्येवमर्थं। पुनरनग्रहणं तेषां पौनमिति तिष्यपुष्यशब्दाभ्यां नक्षत्रेण युक्तः का
ल इत्यन्। तस्याणो लुबविशेष इति लुप्। ततोऽनेनाण्। तिष्यपुष्ययोर्नक्षत्राणि यलोप इति लोपः। संव
त्सरात्। फलपर्वणोरिति। संवत्सरशब्दादण् भवति। फले पर्वणि चाभिधेये सांवत्सरं फलं सांवत्सरं प
र्व सांवत्सरिकमन्यत्॥ ॥प्रावृष॥ ॥अथ किमर्थं प्रत्यये मर्द्दन्यः पठ्यते। न रघाभ्यामिति नेनैव नत्वं न

विध्यति। नैवं शक्यं। इह हि न स्यात्। प्रावृषांतत्वं स्यात्। ठनि तु सति नित्यादिर्नित्यमित्याद्युदात्तत्वं॥ ॥
हेमंताच्च॥ ॥योगविभागस्तत्तवार्थ इति सर्वत्राण् तलोपश्चेति वक्ष्यति। स हेमंतशब्दस्यैव यथा स्याद्व
संतस्य मा भूद्। हि हेमंतवसंताभ्यामिति एकयोगः क्रियेत। ततो वसंतस्यापि स्यात्। तस्यास्तूत्तरत्रानुवृत्तेः॥
॥ ॥सर्वत्र॥ ॥छंदसि पूर्वेण ठनि प्राप्ते भाषायामपि भवत्वणिति तदुच्यते। सर्वत्रग्रहणमित्यादिना स
र्व ग्रहणस्य प्रयोजनमाचष्टे। छंदसि भाषायां चेत्यादिना छंदोऽधिकारनिवृत्तेः फलं दर्शयति। ननु
चेत्यादि। अभ्युदितत्वादेव छंदांसीति नानुवर्तिष्यते। ततो नार्थः छंदोऽधिकारनिवृत्त्यर्थेन सर्वत्रग्रहणे
नेत्यभिप्रायः। सैवेत्यादिना यो — वसुस्रुतत्वादननुवृत्तिः सैव सर्वत्रेत्यनेन शब्देनाख्यायते। किमर्थ
मित्याह। प्रयत्नाधिक्येनेत्यादि प्रयत्नाधिक्यमेतदेव शब्देनाख्यातं। तेन हेतुना पूर्वसूत्रेऽपि सर्वत्रश
ब्दस्य संबंधो यथा स्यादित्येवमर्थं शब्देनाख्यायते॥ कस्मात्पुनः पूर्वसूत्रेऽपि सर्वत्रग्रहणस्य संबंध इष्य
त इत्याह॥ हेमंतिकमिति। हास्यादि हि शब्दो हेतौ। आचार्या हि हैमंतिकमिति भाषायां ठणं स्मरंति। ५

सच्चैवं भाषायामपि सिध्यति। यदि पूर्वसूत्रेऽपि सर्वत्रग्रहणस्य संबंधो भवति। तत्र हि सति पूर्वसूत्रे स्व
यमर्थो भवति॥ हेमंताच्च सर्वत्र छंदसि भाषायामपि ठञ् भवतीति। कः पुनरणयोरनयोर्विशेष इति। न कश्चि
दिति भावः। स्त्रियां हीत्यादिना विशेषं दर्शयति॥ हेमंतीति॥ टिड्ढाणञिति ङीप् तदेवमित्यादि। यत एव त
र्वसूत्रेण भवति। अनेनाण् उलोपसहितः तेन त्रीणि रूपाणि भवंति॥ ॥सायं॥ ॥कालाट्ठञिति ठञि
प्राप्ते सायमादिभ्यः सुतयोश्च तुडागमः। ण्यपवादत्वाच्च ट्युट्युलोस्तुडेव ठस्य बाधितत्वादेव ता
ं पुनश्च स्य संप्रधारणैव नास्ति। तेन च ट्युट्युलावेव भवतः। प्राह्णेतनमिति तयोश्चेत्यादि। यद्य
नादितयोस्तु इति स्यात्। तदा स्वरूपौ प्रत्ययौ न भवत इत्यनादेशो न स्यात्। तस्मादादिष्टयोस्तयोः कृतनादेशा
योस्तु डागमः। एतच्च कालतनेष्टकालनानइति निर्देशो लभ्यते। न त्वत्रनादिष्टयोः सुविधानेन तत्राप्ययुट्
पपद्यते। अथ प्रत्यययोऽधिते करणं किमर्थं। नडुडपवदितिनि प्रत्यययोरपि टित्वं विज्ञास्यत इति। तत्र
स्त्रद्ग्रहणेन ग्रहणात्टागमानं। नैन दृष्टि। युक्तं यस्मात्यय धर्म आगतो भवति। तस्य प्रत्ययत्वात्। तस्मादि

कार्यार्थं प्रत्ययद्वयोरपि टित्वमासज्यते। ल्यन्नेतरलकर्मणीति। घोंनकर्मणीत्यस्या प्राह्ने प्रगे इत्येकारांतत्व
मिति। निपात्यत इति संबंधः। ननु चकालतनेषु कालनाम्न इति सप्तम्या अलुकैव सिद्धं। तुट्पार्थकं निपात
नं। यत्र हि सप्तम्यर्थो नास्ति। तदर्थं निपातनं। प्राह्णः सोढोस्य प्राह्णतमः युगः सोढ स्य युगेतन इति। अत्र हि
न दस्य सोढमिति प्रथमासमर्थात्। प्रत्ययविधानात्। सप्तम्यर्थो नास्ति। तदभावात्सप्तम्यपि नास्त्येव विरूप
रूत्यराणि स्मेनोवक्तव्य इति। व्याख्येय इत्यर्थः। व्याख्यानं तु तद्धिताः इत्यत्रैव कृतं। एवमुत्तरत्रापि वेदितव्यम्॥
चिरशब्दस्य स्नेन उपपदात्। युनाव पिनवतः। युगस्यछंदसि गलोपश्चेति वक्तव्य इति संबंधः। वक्तव्यग्र
हणस्य सर्वत्रार्थः। व्याख्यानेनहाप्रियुणो सर्वविश्वेमाख्याछंदसीति निपातनमाश्रित्य कर्तव्यम्। अद्य चेति
वक्तव्यमिति। अग्रशब्दाड्डिमच्कर्वतीत्येतदर्थरूपं व्याख्येयमित्यर्थः। व्याख्यानं तुक्तमेव। डिवमेति करणंप
श्चादित्यस्य टिलोपार्थं। ननु चाव्ययानां भमात्रे टिलोपो वक्तव्य इत्यनेनैव सिद्धं। न सिध्यत्यत्वात्यस्य
या आरातीय इत्यत्र न भवति। नपेदापि न भवतीकस्य चिद्भ्रांतिः स्यात्। अतस्तन्निरासार्थं डित्करणं॥ ॥

॥ ॥विनाघा॥ ॥पूर्वाह्णेतन इति। अह्नः। पूर्वो भाग इति। पूर्वादिस्त्वेकदेशिसमासः। राजाहःसखि
भ्यष्टजिति टच् समासांतः। अह्नोह्न इत्येन्य इति ह्नादेशः। अह्नोदन्तादिति णत्वं॥ यदा सप्तम्यंतात्प्रत्ययस्तदा स्वा
ह्णेतन इति भवितव्यमिति। सप्तम्यभावात्। सप्तम्यभावस्तु प्रथमासमर्थान्निहितोत्पत्तेः॥ ॥तत्र॥ ॥ ॥
अणादीयाद्यादयश्चेति एकेनादिशब्देनाणादीनामहस्सर्गाणां ग्रहणं द्वितीयेन खादीनां सेषाधिकार
विहितानां सोध्ने मा पुर इति। प्राग्दीव्यतोण्। अस्त्रः। अदयाण इति। उत्सादिभ्योऽञ्। राष्ट्रियोरपारीण
इति। राष्ट्रावारपाराद्धखौ। ग्रामजिलिकोमारिक इति वाहीकग्रामेभ्यश्चेति ठञ्ञिठौ। कादेव एक इति। अंने
य क इति कत्र्यादिभ्यो ढकञ्॥ ॥प्राग्घ॥ ॥एणस्यापवाद इति प्राग्घयत्यच्च इत्यनेन प्राप्तस्य॥ ॥संज्ञा॥ ॥
समुदायेन चेत्संज्ञागम्यते। अनेन समुदायोपाधि दिसंज्ञायादर्शयति। प्रकृतिप्रत्ययसमुदायेन चेत्संज्ञान
गम्यत इत्यर्थः। यद्येवं सारदकादर्शदिर्नैशब्दस्य प्रयोगो न प्राप्नोति। प्रत्ययांतेनानिहतत्वान्नैव दोषः॥
यथैव हि सारदकशब्दोदर्भविशेषस्य नामधेयं। तथा मुद्गविशेषस्यापि। तत्रासति दर्भशब्दप्रयोगेऽने

कार्यसारूप्यत्वात्कस्यनामधेयमितिसंदेहःस्यात्।कोर्थःसारूप्यशब्देनविवक्षितइति।तस्मादसंदेहार्थोदन्
[illegible]त्पाद्यते।संज्ञाधिकारमित्यादि।केचिदितिवचनात्।कश्चिन्नायुवर्णयंतीत्युक्तंभवति॥ ॥पूर्वा॥ ॥
पूर्वाह्णकोपराह्णकइति।पूर्ववदेकदेशिसमासादिकंकार्यंविधेयं।विभाषापूर्वाह्णापराह्णाभ्यामितिठञ्।घुघु
लविधेश्चा।आर्द्रकोमूलकइति।नक्षत्रेणयुक्तःकालइत्यागतस्यानोलुप्।विशेषइतिलुप्।ततोवुन्।निशाप्रदो
षाभ्यांच।तस्येतिठञ्विधेःटनादयनियवेति।आर्द्रशब्देनहुघुलादयोगृह्यंते॥ ॥अमावा॥ ॥एकोदशावि
ष्टाति।तस्येत्यादि।अमावस्यदन्यतरस्यामित्यत्रयोपन्यवृत्तिर्द्विःएषेनिपात्यते।अवृद्धिस्त्ववृद्धेरवकाशःकृतां
याधिकारोभवतीत्येकदेशात्कृत्तत्वममावस्यायाशब्दस्योपपद्यते।येतुसंधिवेलादिष्वृक्षस्तोपधत्वमधीय
ते।तेषांवृद्धुपधस्यग्रहणंनप्राप्नोति।नहिविकृतिःप्रकृतिंगृह्णाति।तस्माद्दीर्घविपाठोयुक्तः॥ ॥ ॥
अच॥ ॥अथयोगविभागःकिमर्थः।ना।अमावास्यायामित्येवोच्यते।चकारोवुनोनुकर्षणार्थोभविष्यति
वावचनत्रोनयोर्विकल्पार्थः।तेनतार्मा।किंत्वेकेनापिभविष्यति।अस्त्येतत्।किंत्वेकयोगेसतिसि— एकराभ्यां ७

न्निनिकन्नपिविकल्पेनभवतीतिकस्यचिद्भ्रांतिःस्यात्।अतस्तन्निवृत्त्यर्थंयोगविभागः।योगविभागेहि
सतिव्यवधानाद्विकल्पस्यकन्निसोविज्ञायते॥ ॥सिंधु॥ ॥अपकरणशब्दाद्दप्येत्सर्गिकेनी।तित्रामवि
धानमितिसंबंधः।अणयथासंख्यार्थोयोगविभागायदिसिंधुपकराभ्यांचकारेणक्तन्नइत्येकयोगःक्रिय
ते।ततोवैषम्याद्वैकस्याःप्रकृतेःप्रत्ययास्त्रयःस्युः॥ ॥सविष्ठा॥ ॥नक्षत्राणश्रवणेप्राप्तेलुगुच्यते।
ननुचनक्षत्रेण्यावर्गाल्लिमित्यनेनैवलुग्भविष्यति।सत्यमेतत्।तस्यैवायंप्रपः।उत्तरदावपियोगोप्रपास्त्रो
तस्यैववेदितव्यो।सविष्ठादयश्चेतेनक्षत्रेणयुक्तःकालइति।अनेनागतस्यानोलुबविशेषइतिस्वेतेलुबन्त
विदिनव्याः।स्त्रिप्रत्ययस्यापिलुकुल्वितलुकीतिलुग्भवतीति।यस्त्रीप्रत्ययांतास्तेषांउपसंख्यानमितिप्रतिपा
द्यमित्यर्थः।तज्ज्ञापरिष्टात्करिष्यते।विदेतुलुक्वित्लते।प्रनष्टाङ्क्रियते।गौरादित्वान्ङीषेति।रेवतिरोहिणीस
त्राक्षन्नमयामांपलोभक्ष्याविनि।स्त्रियामित्यपेक्षतोतननोनैःसुविधानसामर्थ्यन्निलुग्भवति।ठस्यढका
रोढाबर्थः।अतोनकारआद्युदात्तार्थवकुशब्दोव्याख्येयेवर्जते।व्याख्याचुक्तमेवकरिष्यते।अविष्ठाषा

ढाभ्यां॥ लुपिवक्तव्य इति। अत्र स्त्रियामिति। नोत्पद्यते। नकारो वृद्ध्यर्थः। वक्रस्य त्वाष्टस्य स एवार्थः। व्याख्याय
मपि करिष्यते चल्लतमेव॥ ॥स्थानांत॥ ॥गोशालयोर्ह्रस्वांतयोः पाठान्नपुंसकयोर्ग्रहणं विज्ञायते॥
ः नपुंसकलिंगता तु विभाषा सेनासुरेत्यादिना यद्यपि नपुंसकयोर्ग्रहणं तथापि प्रातिपदिकग्रहणे लिं
गविशिष्टस्यापि ग्रहणं भवतीति। स्त्रीलिंगाभ्यामिति लुग्भवत्येव तदाहरणे प्यौत्सर्गिकस्याणो लुक्॥
॥ ॥वत्स॥ ॥वत्सशालशब्दो नपुंसकलिंगो गृह्यते। कुत एतत्। व्याप्तेर्न्यायात्। नपुंसकलिंगस्य हि ग्रह
णे लिंगविशिष्टपरिभाषया स्त्रीलिंगविशिष्टपरिभाषया स्त्रीलिंगादपि लुक् सिध्यति। न तु स्त्रीलिंग
स्य ग्रहणे नपुंसकात्। बहुलग्रहणस्यायं प्रपञ्च इति। वत्सशालशब्दे यद्यपि नत्वत्र वचनेन भवति॥
तथापि बहुलवचनात्ततोपि लुग्भविष्यतीत्यभिप्रायः॥ ॥नक्षत्रेभ्यः॥ ॥रोहिण इत्यादौ नक्षत्राण
पक्षे लुक्। मृगसिरा इति। अत्वसंतस्य चाधातोरिति दीर्घः। मार्गशीर्ष इति। ये च तद्धित इत्यत्र चकारस्या
नुक्तसमुच्चयार्थत्वाच्छिरसः शीर्षभावः। अथ बहुलग्रहणं किमर्थं। नात्पूर्वसूत्रादेव वाग्रहणमनुवर्त्ति ८

ष्यते। इदं प्रयोजनं क्वचिदन्यदेव यथा स्यात्। तेन फल्गुण्यः। षोढाभ्यां ढाणो सिद्धौ भवतः। श्रविष्ठाषाढाभ्यां
छण्यपीति॥ ॥कृत॥ ॥ननु चेत्यादि। यत्नं बहु कृतमुच्यते शब्दस्यार्थः। कृतस्यापि यत्नस्यैव। तस्माद्यत्रकृतेया
तमपि न तत्र भवति॥ यच्च क्रीतमित्यादि। प्राप्तं लब्धमुच्यते। यद्यपि क्रीतं प्राप्तमपि तद्भवत्येव। तस्मात्क्री
तं लब्धमपि भवति। शब्दार्थस्याभिन्नत्वादिति। स्वयमननुभूतकर्तृभावो वा तत्र शब्दस्यार्थः। यात्र शब्दस्य
वक्रिशेषोलक्षितपरव्यापारः स्वयमभिप्रेतो क्रीतशब्दस्यार्थः। प्राप्तिसामान्यं लब्धस्यार्थः। प्राप्तिविशेषो य
स्य मूल्यसेतुका प्राप्तिः सा क्रीतशब्दस्यार्थः। न च सामान्यविशेषयोरेकार्थता युक्ता। मा भूत्पर्यायप्रसंग इति
भिद्यते शब्दार्थः। वस्तुमात्रेणेति। क्रीतलब्धयोर्यदाधारभूतं वस्तुमात्रं तस्याभिन्नरूपत्वात्क्रीतं लब्धं भवति
मात्रग्रहणं शब्दार्थव्यवच्छेदनार्थं। अतएवाह। शब्दार्थस्तु भिद्यत एव। न हि तेन रूपेण क्रीतशब्देन तत्प्रत्या
य्यते। तेन केवल लब्धस्य न। एवं यात्रकृतशब्दयोर्वस्तुत्वेनाभिन्नत्वं। शब्दार्थद्वारेण तु भिन्नार्थत्वमेव। अन्येनैव
हि रूपेण यात्रशब्देन बहुलं प्रत्याय्यते। अन्येन कृतशब्देन॥ ॥प्राय॥ ॥प्रायभवग्रहणमनर्थकमिति।

वैचित्र्यादन्यस्यार्थस्याभावाद्वापार्थकमित्युच्यते। वैचित्र्येण तु सार्थकमित्युच्यते॥ वैचित्र्येण तु सार्थक
मेवकस्मात्पुनरनर्थकमिति॥ तत्र भवेनन्तार्थत्वादिति। यस्मात्प्रायभवस्य साध्यं॥ तस्य न तत्र भव इत्यने
नैव साधितत्वादिति भावः॥ यादृशाद्ये प्रायेण भवति॥ तत्रासौ यो भवत्येव तत्र भवतत्र भवेनस्यांत
र्भावात्तत्र भव इत्यनेनैव स्वस्तंसंपादनमिति। किं प्रायभवग्रहणेन। अनित्यभव इत्यादिना यस्यांत
र्भावं संकथतो स्यादेतत्। अनित्यभवः प्रायभवो नित्यभवस्तत्र भव इति। तस्मात्तत्र भवेन प्रायभवस्या
संग्रहनासिध्यतीत्याशंक्याह। मुक्तसंशयेन तुल्यमिति मुक्तस्य कः संशयो येन तन्मुक्तसंशयं। नाप्य
स्तत्र भवीयमिति यो निश्चितस्तेन तुल्यं भवति। तथा हि स्रुघ्ने भवो देवदत्तः स्रौघ्न इत्युच्यते। न चासौ स्रु
घ्ने सदा भवति। अवश्यं हि कदाचिदुद्देशादीनपक्रामति। अथ च तत्र भव इत्ययो भवति। यदि च नित्यस
भवस्तत्र तयो जिह्वामूलीय इत्यत्र भव इत्यधिकारो जिह्वामूलाङ्गुलेश्छ इति छो न स्यात्। न हि वर्णो नि
त्यं जिह्वामूले भवति। तस्मात्प्रायभवस्य तत्र भवेऽन्तर्भावात्ततो नर्थ्यति सिध्यत इति अनर्थकं प्रायभव

५८

ग्रहणं॥ ॥उप॥ ॥जानुनः समीपं कर्णस्य समीपं नद्याः समीपमिति। अव्ययविभक्तीत्यादिनाव्ययी
भावः। उपजानुक इति। इसुसुक्तान्तात्कः॥ ॥संभवे॥ ॥अवक्लृप्तिरित्यादि अवक्लृप्तिः संभावना। प्र
माणानतिरेक आधारप्रमाणादाधेयप्रमाणस्यानतिरिक्तता। यस्यां सत्यां सर्वमाधेयमाधारमनुकं
प्रविशति। स्रुघ्ने संभवति। यस्तु स्रुघ्ने संभाव्यते स्रुघ्नप्रमाणान्नातिरिच्यते। तदनुप्रवेशात्सवत्वादिकोऽर्थ
एवमुच्यते॥ ॥कोशात्॥ ॥कौशेयवस्त्रमिति। ननु च वस्त्रं कोशे यन्न संभवति। किं तर्हि कृमिभिः। ततश्च क्रिया
विवक्ष्याभावस्त्रो अपि च विशेषानभिधानात् षडसंबंधिनोपि कोशात्प्रत्ययः स प्राप्नोतीत्याह। रूढिरेषे
त्यादि। रूढिशब्दो हि यथाकथंचिदुपपाद्यते। न तत्रावश्यमवयवार्थोऽपेक्ष्यते क्वचिदवयवार्थसंभवा
त्तत्रापि वस्त्रे स्त्रवे वा कौशेयशब्दः साधुभावमनुभवति। न कृमौ। अथ खड्गः कोशादुत्पन्नो कोशे ज
न ततः प्रायो नेष्यते खड्गस्याभिधानं प्राप्नोति। सहि तत्र संभवतीति चेत्। इतरस्मादपि कोशात्प्रत्ययो
त्पन्नो च कृमेरभिधानं प्राप्नोति। सहि तत्र संभवति। अयतत्रोत्पन्नि रूढिवशाद्वस्त्रस्याभिधानं न कृमेः

इतरस्मादपि तद्धितः स्यादुत्पत्त्यंशो वक्तव्यस्याभिधानं न खल्वस्य । एवं मन्यते । यद्यपि संज्ञाधिकारे कोशाऽभि
धीयते । तथापि कौशेयशब्दान्न संज्ञावोऽर्थः प्रतीयते । अपितु विकारोऽर्थः रूढिवशात् । कौशेयं वस्त्रमिति । को
शाद्विकारो वस्त्रमित्यर्थः ॥ तथा च वार्त्तिककारेणोक्तं । विकारे कोशाड्ढण संज्ञातार्थानुत्पत्तेरिति । विकारश्च
कौशेयशब्दात् । किमिकोशस्य प्रतीयते । न खलु कोशस्य । रूढिवशात् । तस्माद्यस्य विकारः प्रतीयते तत
दभियोगित एव कोशशब्दाद्युक्तः ॥ प्रत्ययोरेतस्मात् ॥ ॥कालात् ॥ ॥कालादिस्वर्यते ॥ प्रकृतीन्
न्तरा विशेषयितुं न च स्वरूपग्रहणे सत्यन्तराः प्रकृतयः शक्या विशेषयितुं । स्वरूपस्यासाधारणत्वात्
तस्मादर्थग्रहणमेवैतत् ॥ तेन कालविशेषवाचिभ्यः प्रत्ययाः विज्ञायत इत्याह ॥ कालविशेषवाचिभ्य इत्या
दि । हैमन इति ॥ सर्वत्राण्वतल्लोपश्चा सेमिरमिमित्यादौ संधिवेलादिसूत्रेणोक्तत्वात् ॥ ॥ठञ्च ॥ ॥
योगविभाग उत्तरार्थ इति । उत्तरत्र वुञ्तञ एव यथा स्यात् । साध्वादिषु मा भूत् ॥ ॥श्राद्धे ॥ ॥ठञो
पवाद इति । कालाट्ठञिति प्राप्तस्य । ननु च कालाट्ठञ् विहितो न चाश्वयुजीशब्दः कालवाची । ततः कुतः १०

ठञ्प्राप्तिरित्याशंक्य कालवाचित्वमाश्वयुजीशब्दस्य प्रतिपादयतीत्याह ॥ आश्विनीनियुक्तेत्यादि ॥ ॥
कालापि ॥ ॥कथं पुनः कालाप्यादयः शब्दाः काले वर्त्तन्ते । यावता मयूरादिषु तेषां वृत्तिः प्रसिद्धेत्यत आ
ह । कालाप्यादयः शब्दा इत्यादि । एतदेव विषयं स्पष्टीकरोति । यस्मिन्काल इत्यादि । अश्वत्थशब्दो
वृक्षविशेषे रूढः । तेन सर्व एव कालस्संबध्यत इति तद्द्वारेण कालविशेषो न संज्ञायते । तस्मादश्वत्थफ
लसहचारिणि काले अश्वत्थशब्दो वर्त्तते । इतिशनीतिमाह । यस्मिन्नश्वत्थाः फलन्तीत्यादौ अश्वत्थश
ब्दो यद्यपि वृक्षे वर्त्तते तथापि फले वर्त्तत एव ॥ ॥ग्रीष्मवसं ॥ ॥अण्वुञोरपवाद इति । ग्रीष्मशब्दादृ
त्वाणापवादः ॥ अवरसमाशब्दात्कालाट्ठञः अवरा वासौ समा चेति अवरसमा ॥ ॥संवत्सरात् ॥ ॥काला
ट्ठञि प्राप्ते वचनं चेहकृत्य इति । वुञि विकल्पिते । विनापि ठञ्ग्रहणेन पक्षे यथाप्राप्तं ठञेव भविष्यतीत्य
नि प्राप्तः ठञ्ग्रहणमित्यादि ॥ तत्र यद्यत्र ठञ्ग्रहणं न क्रियते । संधिवेलेत्यादिषु संवत्सरात्फलद्वीपाना
रितिपाठात् संधिवेलाद्यणः अपवादत्वाट्ठञ् स्यात् कोऽनेन विवक्षिते । वुञ्युक्तोऽत्र चस्मात् । ठग्रहणादनापि वा

धिक्येनेव न भवति॥ ॥व्याहरति॥ ॥नित्रिकोनेष्ठः प्रादेशिकत्वप्रादेशि इति। त्रिविधप्रदेशाभ्यां ज्ञाने
नपुंसकेऽपरत्वेनेव न भवति॥ ॥तदस्य॥ ॥कालादिति वर्तते। न च कालो जीयते। तस्मान्निशासहचरितमि
हाध्ययनं गौण्या वृत्त्या निशेत्येवमादिरभिधीयत इति विज्ञायते। अत एवाह। निशासहचरितमध्ययनं
सेति॥ ॥दिगादिभ्यः॥ ॥अञ्चयोरपवाद इति। यदिगादिदिष्टेह दूनायादिति। ततः छस्यापवादः। शेषे
त्यस्त्वतः प्राग्दीव्यतीयस्य। अपमुखयवनयोश्च किमर्थः। पादादिगादिषु यावता शरीरावयवाद्यतो
ताभ्यामुत्तरसूत्रेणैव भविष्यतीत्यत आह। मुखयवनयोरित्यादि। सानवयवा विनो हियो मुखयच्छणश
ब्दौ शारीरावयवाविनो भवतः। पाणिग्रीवादावयवस्वभावं हि शारीरं न चैव मात्मकासेण किं तर्हि रूपा
दिसमुदायात्मिका। संज्ञामिति। उदक्याद्या संज्ञायां गम्यमानायां यड् भवति। उदक्या स्त्री रजस्वलोच्य
ते। न चात्र प्रकृत्यर्थः प्रत्ययार्थो वा विद्यते। साधनयोरविद्यमानता संज्ञाग्रहणेनाख्यायते। संज्ञायाम
न्यत्र उदकमस्य इत्यत्र नो भवति॥ ॥शरीर॥ ॥अणोऽपवाद इति। नप्राप्तेतस्मिन्नस्यारंभ नेयमु ११

पादादिर्दिष्टस्ततः परत्वादणं बाधते॥ ॥दृति॥ ॥इति कुक्षिभ्यां शारीरावयवत्वाद्यपि प्राप्ते। कुक्षिशब्दो धमादिषु
पठ्यते। तस्मादृमादिभ्यश्चेति प्राप्ते शेषे भ्यस्तु निढ विधीयते। अस्तिशब्दस्तिङन्तो मा विज्ञायीत्यत आह। अस्तिश
ब्द इत्यादि विभक्तिस्वरप्रतिरूपकश्च निपाता भवंतीति निपातसंज्ञकं तिङन्तसदृशं प्रातिपदिकमेतेन न तिङन्तं। एत
च्च तिङन्तेन समर्थानार्थश्चायमस्तिहीरा ब्राह्मणीति भिन्नार्थश्चायदाधनं नेवर्त्तते। तथापास्तिमानि निधनवामि
ति गम्यते। तदिहि विशेषस्यानभिधानादुभयस्यापि ग्रहणे॥ ॥ग्रीवाभ्य॥ ॥बहुलवचननिर्देशाद्बहुलवचनान्ता
त्प्रत्ययेन भवितव्यं। अन्यथा त्वेकवचनेनैव निर्देशं कुर्यादिति कस्यचिद्भ्रान्तिः स्यात्। अतस्तां निराकर्तुमाह। ग्रीवा
शब्द इत्यादि। अर्थविशेषाद्बहुवचननिर्देशः कृतः। ननु बहुवचनान्तादेव यथा स्यादिति दर्शयति॥ ॥गंभीरा॥ ॥
बहिर्देवत्यादि। बहिर्देवं चजने भ्यश्चाणो नवनीत्यतदनुरूपश्याख्येयमित्यर्थः। तेन बहिरादिभ्यो पि णो न भविष्यतीति
॥ ॥ऽव्ययी॥ ॥किं तर्हीत्यादि। कथं पुनरव्ययीभावादिति सामान्येनोपमानः प्रत्ययः परिमुखादेवोच्यत आह। परि
मुखादीनाश्चेत्यादि चशब्दो हेतौ। न च पुष्टा यायामन्यकार्यत्ति पुरिमुखादिगणनपाठस्यतत्र यद्येतदपि न स्यात्तदै

कर्तव्यमेव तस्य स्यात्। तस्मात्परिमुखादेरेव भवति। न सर्वस्मादव्ययीभावात्। यद्येवं परिमुखादेरित्येवं वक्तव्यमि
त्याह। तिष्ठमित्यादि। यदि परिमुखादेरित्युच्यते। ततोऽस्त्यव्ययीभावग्रहणेन तत्तु रूपेभ्योऽपि परिमुखादिभ्यः प्र
त्ययः स्यात्। तस्मिंस्तु सति न भवति। परिगतं मुखं परिमुखमिति। प्रादिसमासः। तत्र भवः पारिमुख्यः। अनेन भवति।
अपि चोत्तरार्थमव्ययीभावग्रहणमवश्यमेव कर्तव्यं। अंतःपूर्वपदाट्ठञ्यमात्पर्यन्त्विस्त्वीलिस व्ययीभावाद्यथास्या
त्परिहर्तव्यमिति। गर्ग्युणः। वांतोऽपि प्रत्यय इत्यवादेशः। अयं त्रितमिति। अव्ययं विभक्तीत्यादिनाव्ययीभावः।
एष च परिमुखादिषु पठ्यत इत्यनेन भवति। अत्र परिमुखमिति कथमव्ययीभावो यावता अपपरिबहिरंचवः पं
चम्यामसमस्यंते। पञ्चमीत्यपरिणा कर्मप्रवचनीयेन योगे भवति। कर्मप्रवचनीयसंज्ञा त्वपपरिवर्जनमित्यनेन॥
न च परिमुखे वर्जनं गम्यते किं तर्हि सर्वतो भावः। एवं तर्हि अव्ययमिति योगविभागादव्ययीभावो भविष्यति। अन्ये तु
यत्र परिहेत्वप्रभृतयोऽव्ययीभावास्ते अपपरिबहिरंचवः पंचम्या इत्यनेनैव भवंति। असत्यपि वर्जनं गम्यते। तत्तु लो
ष्टव्यमव्ययमिति योगविभागेनैव येरूपसर्गा वादयः उपसर्गास्ते मामीप्ये अव्ययमित्यादिना। अनुगंगमितियस्य १२

वायाम इत्यव्ययीभावः। अन्ये तु अनुशीवादयो नुपूर्वास्ते पश्चादर्थो व्ययमित्यादिना॥ ॥ अंतः॥ ॥ अंतः शब्दो विभक्त्य
र्थे समस्यत इति। अव्ययं विभक्तीत्यादिना विभक्त्यर्थे त्वधिकरणं। अंतः शब्दस्याधिकरणप्रधानत्वात्समानशब्दाद्गृहनव
कव्यत्राह्यो व्याख्येयः। तत्रेदं व्याख्यानं। इह अंतःपूर्वादित्येवं सिद्धे यदधिकं पदग्रहणं तदधिकमिह कार्यं न भवतीति। एवमपंक्ति
यते। तेन समानशब्दादपि न भवतीति। एतेन शब्दांतरादेवाध्यात्मादिभ्यश्च ऊर्ध्वंदमात्। ऊर्ध्वदेहाच्च लोकोत्तरपदाच्च भवती
ति वक्तव्यं। आध्यात्मिकमिति। आत्मन्यधि अध्यात्मं विभक्त्यर्थेऽव्ययीभावः। अन्येन तिकादीनां श्वेत्तु न यपदविधिः। अध्या
त्मादिराकृतिगणश्चायमिति। यद्येवं समानशब्दात् अंववक्तव्य इत्याद्यनर्थकं। अध्यात्मादिभ्यश्चेत नेनैव सिद्धत्वात्
नानार्थकं। अस्यैव प्रपंचार्थत्वात्। अध्यात्मादिनेव तेन प्रपंच्यते। ननु चाकारान्त ऊर्ध्वशब्दः। तत्कृत इहक्का
रांतमायतमित्याह। ऊर्ध्वशब्देनेत्यादी। ऐहलौकिकः पारलौकिक इति॥ सर्वत्र उभयपदवृद्धिः॥ मुखती
यां पार्श्वतीयामिति॥ अपादाने चाहीयरुहोरिति तसिः। आद्यादिभ्य उपसंख्यानमित्यो तसेरुपसंख्यानिको वा
अव्ययानां भमात्रे टिलोपः इत्यनेन टिलोपः। मध्यीयो वप्रत्ययो वक्तव्याविति॥ मध्यशब्दादित्यपेक्षते॥ ॥

मध्यंदिनंण्चास्मादिति। मध्यशब्दो मध्यंभावमापद्यते। दिनंण्चास्मात्प्रत्ययो भवति। स्थाम्न
इति। स्थामन्शब्दांतात्प्रातिपदिकात्। अश्वत्थामेति। अश्वस्येव स्थाम बलमस्येति बहुव्रीहिः
पृषोदरादित्वात्सकारस्य तकारः। अश्वत्थाम्नि भव इत्यण्। तस्य लुक्। अजिनांताच्चेति। लुगिति
संबध्यते। वृकाजिन इति। अणो लुक्। समानस्येति। आनंतर्यलक्षणा षष्ठी समानशब्दादनंतरं यन्नि
ष्पन्नं तदित्यर्थः। अध्यात्मादिभ्यश्चेति। वैषयिकेऽधिकरणे सप्तमी। अध्यात्मादिविषये ठञ् निष्पन्नं तद
त्यर्थः। ऊर्ध्वंदमाच्च देहाच्चेति। ऊर्ध्वशब्दात्परस्मात् दमशब्दात् ऊर्ध्वशब्दाद्देहशब्दाच्च ठञ् निष्प
न्न इत्यर्थः। ऊर्ध्वंदमस्य परस्य चेति। वकारादाय्यश्च प्रत्ययः। ईयः कार्योऽर्थे मध्यस्येति। अयं शब्दः स
मुच्चये। मध्यशब्दस्य चानंतरः ईयः कार्य इत्यर्थः। मण्मीयौ प्रत्ययौ तथेति। मध्यशब्दादित्यपेक्षते
मण्मीयौ मध्यशब्दस्यानंतरौ कर्तव्यौ। अजिनान्तस्येति। अजिनांताद्वृकस्या॥ इत्यर्थः॥ ॥
ग्रामात्॥ ॥पारिग्रामिकमिति॥ ग्रामात्परीति। अपपरिबहिरंचवः पंचम्या इत्यव्ययीभावः १३

आनुग्रामिकमित्यत्राप्यनुर्यत्समयेति॥ ॥जिह्वा॥ ॥यतोपवाद इति। शरीरावयवाच्चेति प्राप्तस्य
॥ ॥अत्र॥ ॥छेप्राप्त इति निर्वर्त्तसूत्रेण॥ ॥कर्ण॥ ॥कर्णिकाशब्दश्चाभरणविशेषे रूढः। रूढिशब्दे
ष्वनावयवमपि कर्णसंबंधेन नेवितव्यं॥ ॥तस्य व्याख्यान इति॥ ॥व्याख्यायतेऽनेनेति व्याख्या
नं करणे ल्युट्। चकारात्तत्र भवे चेति। ननु च व्याख्यानं प्रत्ययार्थस्तस्य समीपे चकारः। समुच्चयं करोति
तथा केदाराद्यञ् चेति प्रत्ययसमीपवर्त्तिनोऽश्रूयत इति प्रत्ययार्थमात्रस्येव समानजातीयस्य तेनानु
कर्षणं न्याय्यं। ननु समर्थविभक्तिरपि समानजातीयस्य तु चकारः समुच्चयं करोति॥ तथा केदारा
द्यञ् चेति प्रत्ययसमीपवर्त्तिना चकारेण प्रत्यय एव समुच्चीयते। तथा ठञ् कवचिनश्चेति प्रातिपदिक
समीपस्थेन चकारेण प्रातिपदिकमेव। तत्र प्रत्ययार्थमात्रस्येवानुकर्षणे सति समर्थविभक्त्यंत
रोपादानात्सर्वस्याः समर्थविभक्तेर्निवृत्तौ सत्यां न वार्थे षष्ठी समर्थादिवमत्ययो मुक्तः। तदयु
क्तमुक्तं। तत्र भवे चेति। तस्य भावेनेति चकारं मुक्तमित्यत आह। वाक्यार्थसमीप इत्यादि। इहेति कर

णेन तस्य व्याख्यान इत्येषोऽर्थः। प्रत्यवमृश्यते ननु व्याख्यान प्रत्ययार्थः। तस्मादितिकरणेनेतरसमुच्चा
रितत्वकारणत्वप्रत्यवमृश्यस्य वाक्यार्थस्यैव समीपेऽभ्रियमाणः उपजातीयमेव वाक्यार्थं समुच्चिनोति
तेन भवार्थसमर्थः समर्थादेव प्रत्ययो भवति। न त्वन्यथा सर्वे वाक्यार्थ उपपद्यते। इतिकरणश्च व्याक्या
र्थसमुच्चयो यथास्यादित्येवमर्थ एव कृतः। अन्यथा हि तस्य व्याख्याने चेत्येवं ब्रूयात्। कः पुनरसौ वाक्या
र्थ इत्याह। तत्र भव इति। ननु पाटलिपुत्रशब्दो व्याख्यातव्यनामेति। ननु च पाटलिपुत्रः सुकोशला
या व्याख्यायते। नियतं तेन व्याख्यानस्येन भवितव्यं। अन्यथा तस्य व्याख्यानी सुकोशला न स्यात्। तस्य
व्याख्यानस्य पाटलिपुत्रशब्दो व्याख्यातव्यनाम भवतीति। तत्कथमुच्यते न तु पाटलिपुत्रशब्दो
व्याख्यातव्यनाम भवतीति। नैतदस्ति। यदिह व्याख्यातव्यमभिप्रेतं न तस्य एतन्नाम भवतीति भा
वः। किं चेह व्याख्यातव्यमभिप्रेतं। यद्व्याख्यातव्यतया लोके प्रसिद्धतरम्। ऋगयनादि तत्र। व्याख्यातव्य ९४
नामग्रहणेन। इह हि व्याख्यातव्यनामग्रहणं व्याख्यातव्यार्थं शब्दनकर्त्तव्यमेव। विनापि हि तेन व्याख्या

तव्यनाम्न एव प्रत्ययसिद्धेः। तथा हि तस्येति। तस्य प्रतियोगिव्याख्यानमुपात्तम्। तच्च व्याख्यातस्यैव सं
भवति नान्यस्य। तस्माद्व्याख्यातस्य व्याख्यातव्यं। सामर्थ्यादेव तस्येत्यनेन षष्ठ्यन्तेनोपादीयत इति विज्ञा
यते। तत्रान्तरेणापि व्याख्यातव्यग्रहणं व्याख्यातव्यनामाभिधायिन एव प्रत्ययो न विष्यतीति। किं
व्याख्यातव्यनामग्रहणेन। तत् क्रियते व्याख्यातव्यतया लोके प्रसिद्धतरास्तदभिधायिभ्य एव प्रत्य
यो यथा स्यादित्येवमर्थं। व्याकरणादयो ग्रन्थविशेषा लोके प्रसिद्धाः। न तु पाटलिपुत्रादयः एव
मपि नामग्रहणं न कर्त्तव्यं। व्याख्यातव्यग्रहणसामर्थ्यादेव हि व्याख्यातव्यतया प्रसिद्धतरेभ्यः प्रत्ययो
लभ्यत एव। नैतदस्ति। व्याख्याने हि प्रत्ययार्थे व्याख्यानादेव व्याख्यातव्यवाचिनः प्रत्यये सिद्धे पुनर्व्या
ख्यातव्यग्रहणसामर्थ्याद्व्याख्यातव्यतया ये प्रसिद्धास्तेभ्यः प्रत्ययो लभ्यते। न तु तत्र भवे तत्र साम
र्थ्याभावात्। तेष्वपि चार्थेन तत्र व्याख्यातव्यतया प्रसिद्धतरास्तदभिधायिभ्य एव प्रत्यय इष्यत इति।
न तु यतः क्रतुभ्यश्च। तस्मादिह वाधिकारे रूढ्युपसंग्रहार्थं नामग्रहणं कर्त्तव्यम्। अथ किमर्थमभिव्याख्या

नयोर्युगपदधिकारः क्रियत इत्याह। नञ्‌स्वाख्यानयोरित्यादि। अत्रादीनपादानत्रानिष्ठस्यामीत्येव
मर्थो युगपदनयोरधिकारः। ननु किमुच्यते। अपवादविधानार्थमिति। नञ्‌नः कृत्तानामणादीनामर्थ
निर्देशोय यास्यादित्यत आह। ततनिर्देशो हि नाविति। ननु निर्देशो दिनावर्षो एकत्त्रन चार्दति
अपरस्यस्येदमिति। तस्येदं विशेषत्वा ह्याख्यानस्य॥ ॥बह्वच॥ ॥पात्वणन्चिकमिति। नातानति
कमिति। उनयत्र द्वंद्वात्प्रत्ययः। समासस्वरेणांतोदात्तः प्रत्तनय इति। समासस्य च इत्यनेन। वहु
वचननिर्देशाश्च एवं जानीयापर प्रत्तस्यपेक्षया ह्यचष्कं। व्यत्यपति। द्यज द्वालक्षण इत्यादिना।
सोयंतेङमिति। सुप्तिङ्‌ शाष्ठो प्रातिपदिकस्वरेणांतोदात्तो। ननिस्वरेणाद्युदात्त इति। गतिरनंतर इ
त्यनेन। अंतग्रहणं विस्पष्टार्थं। सर्वोदात्तस्य प्रातिपदिकस्यासंभवात्। सामर्थ्यादेव तदंतविधि
।ध न्नविष्यतीति। यथा वर्णादिनुदात्तानो पधात्तोनइति। अपि चोदात्त इति। वर्णग्रहणं सर्वत्र तदंतवि
धिं प्रयोजयतीति युक्तएव तदंतविधिः॥ ॥क्त्व॥ ॥अनंतोदात्तार्थ आरंभ इति। यद्येवं राजसूयिकवाज १५

पेयिकमित्येतदेवोदाहरणद्वयं युक्तं। राजसूय वाजपेय शब्दयोः न्न हंतोत्तरपदयोः प्रत्ततिस्वरेणमध्यो
दात्तत्वात्। उत्तरपदं चानुदात्तमत्र। एकं कृबंतत्वात्तत्स्वरेण। अपरं यतोनाव इति। समासे चक्तनेग
तिकारकोपपदात्कृदिति प्रकृतिभावेनाद्युदात्तमेवावतिष्ठते। आग्निष्टोमिकं॥ नावयत्तिकमिति। ए
तदुदाहरणद्वयमयुक्तं। अग्निष्टोमनवयज्ञ शब्दाभ्यां प्रत्ययस्वरेणांतोदात्ताभ्यां। अनेनाप्राप्तेः। न
हि सर्वेनानेन वा। त्रिविशेषः। तत्तुसाहचर्यादित्तोदाहृतं। शष्ट्कः साहचर्याद्दिर्भन इति विज्ञायते॥
पुरोडाशासहचरित इति॥ ॥पुरोडाशस्येदमित्यंतोदात्तः॥ ॥तस्माद्वृद्धचोंतोदात्ताकन्निप्रा
प्तः पुरोडाशात्कंलघावंते द्वयोश्च वद्धशो गुरुरिति मध्योदात्तः। तस्मादणि प्राप्ते छन्‌विधीयते। षकारो
ङीषर्थः। नकारस्त्वाद्युदात्तार्थः। तेषां संस्कारो मंत्रः पौरोडाश इति। पुरोडाशासहचरित इत्यपि
नाद्यर्थ्यात्साहचर्याद्धि। पुरोडाशाये न मंत्रेण संस्क्रियंते तत्र पुरोडाशाशब्दो वर्तते। न पुरोडाशेषु
कृतएतत्। व्याख्यातव्यनामयग्रहणानुवृत्तेः। न हि पुरोडाशाः व्याख्यातव्यतया प्रसिद्धा नराः॥ ॥

ध्याने ॥ ॥ अयनादेरपवाद इति । आदिशब्देन छन्दः । तत्र येऽकारान्ता उद्गात्रप्रभृतयो बहु-
चोऽन्तोदात्तास्तेभ्यः छन्दोपचारो ब्राह्मणप्रथमाध्वरेभ्योपि नैं छन्देवा नेपि बह्वचः प्रातिपदिकस्वरे
णांतोदात्ताः ॥ नामाख्यानशब्दादपि समस्तादस्यैव । सोपि बह्वच्समासस्वरेणांतोदात्तस्य ॥
पारिशिष्टेभ्यो णः । याम्युक्तं । पांचहोत्रकमिति । इसुसुक्तांतात्कः । पंचहोरचतुर्होतृशब्दा विगेन
द्विगाविति पूर्वपदप्रकृतिस्वरेणाद्युदात्तौ । पूर्वपदं हि तत्र संख्याया इत्यनुदात्तौ । पुरश्चरणशा
ब्दोप्युदात्तः । उत्तरपदप्रकृतिस्वरेण मध्योदात्तः । आख्यानशब्दो गतिरनंतर इत्याद्युदात्तः । सं
ज्ञानविग्रहाणार्थमिति । नचैकदेशसमाश्रयणात् अप्यनेन निर्वेदितव्यं ॥ ॥ अण् ॥ ॥ छन्दोदेर
पवाद इति । आदिशब्देन छन्दस्य च । तत्र ये बह्वचोऽन्तोदात्तास्तेभ्यः छन्दः । विद्यान्यायशिक्ष्य
शब्देभ्यो द्यमन्तलक्षणस्य छः । व्याकरणशब्दाद्बह्वच्छस्य । अण्ग्रहणं किमर्थं । तत्पक्षगयनादि
भ्यो यथाविहितमेवोच्येत । नचैवं सत्यपवादाछाद्यनादयः स्युरितिसंतोष्यते । अपवादविधानस्य १९

हि वैयर्थ्यं स्यात् । तस्माद्वचनप्रामाण्यादयं विहितो न च प्राप्नोति । अनेन बाधितत्वात् । स एव भवि
ष्यति सचाणैवेत्यत आह । अण्ग्रहणमित्यादि । तत्र यद्यण्ग्रहणं न क्रियेत तदायं छत्रद्रछमंतो
दात्तम् । तस्माच्छेनाबाधिते पुनर्वचनादण् एव भविष्यति । तस्माच्छस्य बाधकस्य बाधनार्थमण्ग्रह
णं । तेन वास्तुविद्याशब्दादिति मिष्टं भवति । वास्तुविद्याशब्दो द्वन्द्वः समासस्वरेणांतोदात्तस्य । ऋग
यनेत्यादि । ऋगयनमिति । अयनशब्दो भावसाधनः । ऋचामयनं । यद्यपि तावेवस्तु । तथापि ऋ
चेदोपचारात्तद्धितग्रंथे व्याख्यातम्येवर्त्तते । मत्वानो भावकर्मवचन इत्यंतोदात्तः । येऽस्मि करणेल्यु
ट्तत्त्वात् ऋगयनशब्दो वृत्तसाध्यते । सत्तु उत्तरपदप्रकृतिस्वरेण पाठं प्रयोजयति । ततः प्राग्दीव
तो लित्येवं सिद्धः । पदव्याख्यानच्छन्दःसत्र निरुक्तव्याख्यानस्य नामत स्वानया जकादिकोतात् इत्यं
तोदात्तः । मानेति मनोधनितोर्यदा वच्च तद्रूपाप्यच्चत्तत्का जविनकाणमिस्संतोदात्तः । अपमि
नानेल्युड्हात्तदा नो भावकर्मवचन इत्यंतोदात्तः । छंदोभाषेति गतिकारकोपपदात्कृदिति तत्स

रेणांतोदात्तः। नाथान्नाष्ट्रो गुरोश्च हलः इत्यकारप्रत्ययांतो व्युत्पादितः। छंदो विजानीतीति निमन्त्रि
नीत्यादिनांतोदात्तः। त्यक्तं पुनरुक्तं। नाष्टः। पाप्यवनक्ता जविचित्रकाणमित्यंतोदात्तः। निरु
क्तः संज्ञायामनाम्नीनादीनामित्यंतोदात्तः। व्याकरणे नाष्टोल्फडंनो मध्योदात्तः। प्रत्ययस्व
रेणांतोदात्तः। वास्फविद्या नाष्टो अंगविद्या क्षत्रियविद्येति। एते समासस्वरेणांतोदात्ताः। उ
त्पातउद्गादित इत्येतो धाधादिस्वरेणांतोदात्तौ। संवत्सरः। अत्रोः सरणि संवत्सर इत्येवं कृत्सा
दित्वात्संवत्सरनाष्टो अंतोदात्तो इत्यितिलिषिष्मः कृणलादयो बहुलमिति सर्वे द्वे वर्तिरपि
भवति। मुहूर्तं तेडूनो क्रे रागमः तेन मुहूर्त्त इत्यंतोदात्तः। निमित्तनाष्टोपि प्रातिपदिकस्वरेण। उ
पनिमुर्वादिसरैः क्षिप्रलक्स्वरेणांतोदात्तः॥ ॥ननु॥ ॥अथपरकघ्नाद्रा ठन्द्र हन्मलादागत
इति। अत्र द्रद्ग्रलनाष्टात्प्रत्ययः कस्मान्न भवतीत्याह। मुख्यमित्यादि। मुख्यं प्रधानं विवक्षि
तं तदिह परिगृह्यते। नत्वानांतरीयकमप्रधानं। नहि मुख्यमेतनिरस्याप्रधानस्य ग्रहणं युक्तम्। मु १७

ख्येकार्यसंप्रत्ययात्॥ ॥अंगुडिका॥ ॥आयस्थानठकोपवाद इति। बाह्वल्यादेवमुक्तं। यस्माच्छ
कण्नाष्टोत्र पठ्यते। नत्विह लुक्णपर्णाद्विरह्यात्न इति प्राप्तस्य ठस्यापवादः। तीर्थशाड्ष्मह धूमा
दिषु पठ्यते। ततो धूमादिभ्यश्चेति प्राप्तस्य वुञोपवादः। अथाणग्रहणं किमर्थं। नत्वंगुडिकादिभ्यो
यथाविहितमेवोच्येत। नचैवं पठ्यमानेऽपवाद एवस्यादिमाशंकनीयो। अपवादविधाने हि वचन
वैयर्थ्यं स्यात्। तस्मादंतरेणाप्यण्ग्रहणमणेव भविष्यतीत्यत आह। अणग्रहणमित्यादि। उत्स
पानन्नाष्टोत्र पठ्यते। आयस्थानवचनो उत्सादिष्वसौ पठ्यते इति नासत्यणग्रहणे आयस्थानठ
कं बाधित्वा उत्सादिभ्यो ञित्यञ्ञेवस्यात्। तस्मात्तस्य बाधकस्य बाधनार्थमणग्रहणं। तेनोत्सपा
न इत्यत्राण् सिद्धो भवति॥ ॥ठन॥ ॥तपरकरणं मुखसुखार्थमिति। अथा दीर्घनिवृत्त्यर्थं
कस्मान्न भवति। असंभवात्। नहि विकृद्यायोनिसंबंधिषु किंचिदूकारांतं प्रातिपदिकमस्ति
यन्निवृत्त्यर्थस्तकारः स्यात्॥ ॥पितुः॥ ॥पितमिति। रीङृत इति रीङ्। यस्येति लोपः॥ ॥

गोत्रात्॥ ॥यदि गोत्रादङ्कवत्प्रत्ययविधिर्भवतीत्युच्यते। अण एवातिदेशः प्राप्नोति न वुञः
यस्मादण्विधावेवाङ्कग्रहणमस्ति। संघाङ्कलक्षणेष्वञ्यञिञामणित्यत्र। न तु वुञ्विधौ गोत्रचरणाद्वुञि
तत्रेत्याह। अङ्कग्रहणेनेत्यादि। यथा काकेभ्यो दधि रक्ष्यतामित्यत्र काकग्रहणमुपघातसामान्योपलक्षो
पलक्षणमेवमिहाप्यङ्कग्रहणं तस्येदमित्यस्यानेनार्थस्त्रार्थोपभिवति। यथा तस्येदमित्यत्र गो
त्रान्तस्य योऽभवति। तथान्तत आगत इत्यत्रापि। तेनतुनोप्यतिदेश उपपद्यते। नन्वेवमप्यणो
ऽतिदेशो न प्राप्नोति। न हि तद्विधौ गोत्रग्रहणमस्ति। पूर्वसूत्राद्गोत्रग्रहणमनुवर्त्तत इत्यदोषः
संघाङ्कलक्षण इत्यादिना येन सूत्रेणाण्विहितस्तं दर्शयति॥ ॥हेतु॥ ॥समादागतं इति
समाद्धेतोरागतम्। अस्यार्थः। केन पुनरिह पञ्चमी। अस्मादेव ज्ञापकात्। यदयं पञ्चम्यन्तात्प्रत्य
यमाह। ततो ज्ञायते हेतौ पञ्चमी भवति॥ ॥मयट्॥ ॥योगविभागो यथासंख्यनिरासार्थ
इति। ननु चान्यतरस्यां ग्रहणेनौत्सर्गिकेऽप्यनुज्ञायमाने वैषम्याद्यथासंख्यस्य प्राप्तिरेव नास्ति १८

सत्यमेतत्। यस्तु मयटोरनुवृत्त्वाद्वितीयमानापेक्षया यथासंख्यं मन्यते। हेतौ पञ्चमी भवति॥ ॥
तं प्रति योगविभागः क्रियते॥ ॥प्रभवति॥ ॥प्रथमत उपलभ्यत इत्यर्थ इति। प्रथम इत्यनेन प्र
शब्दस्यार्थमाचष्टे। उपलभ्यत इत्यनेनापि भवतेः। अनेकार्थत्वाद्धातूनां भवतिरिहोपलब्धौ
वर्त्तते। हिमवतः प्रभवतीति। ध्रुवः प्रभव इति हिमवतोऽपादानसंज्ञा॥ ॥विदूरात्॥ ॥तत्र तु
संक्षिप्यत इति। तुशब्दोऽवधारणे। संक्षिप्यत एव च तत्र विदूरे नगरे। न ततः प्रभवति। वालवायो
विदूरं चेति। वालवायशब्द एव प्रत्ययमुत्पादयति न विदूरशब्दः। प्रभवतिशब्दस्य प्रथमत उ
पलभ्यते। अपि तु वालवाये पर्वते। तस्माद्यतः प्रभवति तद्वाचिवालवायशब्दः प्रकृतित्वेनाश्रि
यते। यथा विश्रवण इति। आदेशावेव शिवादिषु पठ्येते। अपत्याधिकारान्वयेन तयोरपत्या
पत्यवत्संबंधः स एव प्रकृतित्वेनाक्षिप्यते। विश्रवःशब्दः। विश्रवसोऽपत्यं वैश्रवणो रावणः। अपवा
प्रकृत्यन्तरमेव। विदूरशब्दो वालवाये वर्त्तते। विदूरात्प्रभवति। वालवायात्पर्वतात्प्रभवतीत्य

र्थः। एवं स्थिते यो ब्रूयात्। नैव तत्र बालवाये प्रसिद्धो विदूरशब्द इति तं प्रत्याह। जित्वरीवदुपचरे
दिति। यथा वाणिजा एव वाराणसीं नगरीं जित्वरीमित्युपचरन्ति। मंगल्यार्थमिति लोकाः। एवं वै
याकरणा एव बालवायं विदूरं इत्युपचारयंति। नियतदेशपुरुषविषया अपि रूढयो भवं
तीत्यनेन जित्वरीवदित्यनेन कथयति॥ ॥तङ्क॥ ॥पथो निःक्रियत्वात् इमेः कर्तृत्वं नोपप
द्यत इत्याह। तत्स्थेष्वित्यादि। पुरुषस्य निर्गमनं पथ्युपचर्यत इति दर्शयति। अथ वेत्यादि। प्राप्त
वत्र गमिर्वर्तते। अस्ति च प्रत्यग्रगमो यथा वृक्षाग्रादीनां पथ्योऽस्यैवानन्तर्यलक्षणा प्राप्तिः॥ ॥अग्नि
॥ ॥कथं पुनः करणत्वेन प्रसिद्धं द्वारं स्वातंत्र्येण विवक्ष्यत इत्याह। यथेत्यादि। यथा छेदनक्रिया
यामसिः करणत्वेन प्रसिद्धोऽपि स्वातंत्र्येण विवक्ष्यते। ननु चेतनावतो निष्क्रमणं भवति। चेतना
वता प्रयुक्तस्य वा। देवदत्तो निष्क्रामति। शकटं निष्क्रामतीति। न च तद्द्वारं चेतनावत् नापि चे
तनावता प्रयुक्तं। तस्मान्नोपपद्यते। तस्य निष्क्रमणं। नैष दोषः। अचेतनेऽपि निष्क्रमतीति १८

व्यवहारो दृश्यते। तद्यथानेन गुहामुखेन वायुर्निष्क्रामतीति। निष्क्रियता तर्हि नोपपद्यते। तत्र
स्थेऽपि निष्क्रमत्सु द्वारं निष्क्रामतीत्युपचर्यत इत्यदोषः॥ ॥अधिकृत्य॥ ॥ननु च तदिति क
र्मणि निष्ठा। ततश्च तया विहितत्वात्कर्मणो द्वितीया न प्राप्नोतीत्याह। अधिकृत्येत्यपेक्षया द्विती
येति। ल्यबन्तेन या क्रिया तन्निधीयते तदपेक्षया द्वितीया न च तस्या यत्कर्म तत्केनचिदभिहितं। निष्ठ
या हि ग्रंथात्मकमेव कर्माभिहितं। न तु ल्यबंतक्रियाया यत्कर्म सुभद्रादिकं तदपि। गिरिमित्रम
धिकृत्य कृतो गैरिमित्रः यथा तिमधिकृत्य यायातः। सुविल्वादि। आख्यायिकार्थे इति तादर्थ्ये
चतुर्थी। आख्यायिकार्थमाख्यायिकामभिधातुं प्रत्ययस्य तु भवतीत्यर्थः॥ ॥शिशु॥ ॥
यमसभमिति। समारालेत्यादिना नपुंसकलिंगता। यदीदृजननादावेव शिशुक्रन्दयोद्वष्ट
त्वाः। तत्किमर्थं पृथक् ग्रहणमित्याह। प्रपंचार्थमित्यादि। एवं च सतीत्यादि। चशब्दो हेतौ। यस्मा
दिंद्रजननादिराकृतिगणः। तदं नभ्यितानामेव। शिशुक्रन्दादीनां प्रपंचार्थं ग्रहणं। तस्मादेवमर्थे

अस्मिन्नस्तीति देवासुरादीनां प्रतिषेधो वक्तव्यः। प्राप्त्यभावात्। येभ्य एव वृद्धप्रत्ययोयं दृश्यते। न एवं इंद्र
जननादयः न च देवासुरादि दृश्यते॥ ॥अभिजन॥ ॥तत्संबंधाद्देशोपि अभिजन उच्यत इति यथा
यष्टीः प्रवेशयेति। यष्टिसंबंधाद्यष्टिशब्दः पुरुषे वर्तते। तथाभिजनशब्दो देशे वर्तते। कः पुनरसौ यो
ऽभिजनसंबंधादभिजन उच्यत इत्यत आह। यस्मिन्नित्यादी हादेशवाचिन इत्यादि। कथं पुनर्मुख्येऽभि
जने गौणात्प्रत्ययो भवति त्याह। निवासप्रत्यासत्तेरिति। निवासोनु लक्ष्यते तेनाभिजनो विशेष्यते। नि
वासाभिजनयोरिति। तस्माद्देशवाचिन एव प्रत्ययो भवति। न बंधुभ्यः। तेषामनिवासत्वात्। निवासाभि
जनयोः को विशेष इति नास्त्येव कश्चिद्विशेषः। अभिजनस्य निवासभूतत्वादिति मन्यते। यत्रेत्यादि
ना विशेषं दर्शयति। योगविभाग उत्तरार्थ इति। उत्तरेषु योगेष्वभिजने प्रत्यया यथा स्युः न निवास
मात्र इति॥ ॥आयुध॥ ॥आयुधजीविभ्य इति। तादर्थ्ये चतुर्थीति। पंचमीं निराकरोति। य
दि ह्येषा पंचमी स्यात्। आयुधजीविभ्य एव पर्वते विधेयो छो भवतीत्येष सूत्रार्थः स्यात्। न चेष्यते॥ २०

तस्मात्तादर्थ्य एषा चतुर्थी। न पंचमीति। सांकाश्यकाद्इति धन्वयोपधाद्वुञ्॥ ॥शंडिक॥ ॥अण
ऽपवाद इति। आदिशब्देन छादेः। अत्र ये शंडिकादिषु पठ्यंते नानाच्ह्रते तेषां मतेन पूर्वसूत्रेण प्रा
प्तस्य छस्यापवादः। ये तु जनपदशब्दात्। तेषामवृद्धादपि बहुवचनविषयादिति प्राप्तस्य वुञः। शंडि
कशब्दात्कोपधादणिति प्राप्तस्याणः॥ ॥सिंधु॥ ॥प्रभृतय इति। प्रभृतिशब्देन मधुमत् कंबो
ज साल्व कश्मीर इत्येते गृह्यंते। गांधारि किष्किंधि मार द्विगर्त सदरत इत्येतेषामवृद्धादपि इत्यादि
ना वुञि प्राप्ते वचनं। तक्षशिलादिष्वपि। कोमेदुर कांडवारण ग्राम णीत्येतेषां वृद्धाच्छ इति छे प्राप्ते॥
शेषाणां प्राग्दीव्यतोणित्यणि॥ ॥भक्तिः॥ ॥भज्यते सेव्यते भक्तिरिति भजसेवायामित्येतस्मात्क
र्मसाधनः क्तिन्॥ ॥अचि॥ ॥ननु च देशकालयोः प्रतिषेधात्तेन वयुक्तेन्यायेन प्रवृत्तिरचेतन
नैव विज्ञास्यते। तत्किमचित्तग्रहणेनेनेत्यत्रोक्तं। विना हि तेन देशकालादिति न ज्ञायते किमयं प्रवृ
त्ति निर्देशः। उत देशकालयोः प्रतिषेध इति। तत्रानिष्ठमपि विज्ञायते। अदेशत्वात्कालशब्दा

ध्वेति। अचित्तग्रहणेऽसति तेनातिप्रसंगे सति। अदेशकालादिति प्रतिषेधो विज्ञायते। अस्मादेव च प्र
तिषेधादचित्तादिति स्वरूपग्रहणं न भवति। स्वरूपग्रहणे हि देशकालाभ्यां प्रसंगो नास्तीति प्रतिषे
धं न कुर्यात्॥ ॥महा॥ ॥ननु च सर्वत्रात्रादेव ठगनुवर्त्तिष्यते। तत्रापि महाराजिक इति सिध्यते
व। तत्कथं ञप्रत्ययांतरं क्रियत इत्याह। प्रत्ययांतरकरणमित्यादि। ञित्स्वरेण ह्युदात्तत्वं यथा स्या
दिति प्रत्ययांतरकरणं॥ ठकि हि सति तद्धितस्येति इत्यंतोदात्तत्वं स्यात्॥ ॥वासुदेव॥ ॥वासुदेव
मित्यादि। शब्दाद्वृद्धाच्छस्यापवादः। अर्जुनशब्दादौत्सर्गिकस्याणः॥ ननु चार्जुनशब्दः क्षत्रियाख्यः
तस्मादुत्तरसूत्रेण प्राप्तस्य वुञोपवादो युक्तः। एवं मन्यते। बहुलग्रहणं न च क्रियते। तेन अर्जुनश
ब्दाद्वुञ्प्रत्ययस्य प्राप्तिरेव नास्ति इदं तस्माद् अस्मादणो वस्यात् अनतोदपवादो न्याय्यः। ननु चेत्यादि
चोद्यं। तस्मादेतत्तयोर्वुञ्वुनोर्विशेषोस्ति यतो वासुदेवशब्दाद्वुन् विधीयत इत्याह। न चात्रेत्यादि। वासुदे
वशब्दस्य च वुनि वुञि वा सति कश्चिद्विशेष इति। तथा कृत्ययत्र तदेव रूपं। स एव स्वरः। योपि वुञि पुंव २१

द्भावप्रतिषेधो वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे इति। स वुन्यपि लभ्यत एव। न कोपधाया इति। सं
ज्ञेत्यादिना यदुक्तं। ननु च वासुदेवशब्दात् गोत्रक्षत्रियाख्येभ्य इति वुञ् अस्त्येवेति। तन्निराकरोति॥
गोत्रक्षत्रियाख्येभ्यो वुञ् विधीयते। न च वासुदेवशब्दो गोत्राख्यं प्रातिपदिकम्। नापि क्षत्रियाख्यं। तत्कु
तो वुञः संभवः। अजाद्यदंतमित्यादि। इति करणः प्रत्येकमभिसंबध्यते। अजाद्यदंतमित्यनेनाल्पाच्तरमि
त्यनेन वा। अर्जुनशब्दस्य पूर्वनिपातमकुर्वतैतज्ज्ञापितं। अभ्यर्हितं पूर्वं निपततीति। तेन मातापि
तरौ। श्रद्धामेधे। दीक्षातपसी इत्यत्र श्रद्धादेरभ्यर्हितस्य पूर्वनिपातः सिद्धो भवति। अभ्यर्हितत्वं वा
सुदेवशब्दस्य देवताविशेषत्वात्॥ ॥गोत्र॥ ॥ग्लौचुकायनको ग्लौचुकायनक इति। ग्लुचुकं ग्लुचु
कशब्दात् प्राचामवृद्धात्फिन्। तदंताद्वुञ्। आख्याग्रहणं किमर्थं। न गोत्रक्षत्रियेभ्य इत्येवोच्येत
तत्राह। आख्याग्रहणमित्यादि। यद्याख्याग्रहणं न क्रियेत ततो येपि यथा कथंचित्क्षत्रियवर्त्तिन
स्तेभ्योपि स्यात्। नेष्यते। तस्मात्प्रसिद्धक्षत्रियपरिग्रहार्थमाख्याग्रहणं क्रियते। तेनेह न भवति। विहार

क्षत्रियो भक्तिरस्येति। न विद्वद्धः क्षत्रियश्शब्द इति प्रसिद्धः। क्षत्रियशब्दस्य तु सामानाधिकरण्या
त्। क्षत्रिये वृत्तिर्गम्यते। पाणिनीयमिति। पाणिनोपज्ञमित्यण्। गोत्राद्विदर्थीत्यादिना प्राप्तस्ति भावः। पा
णिनो भक्तिरस्येति वृद्धाच्छः। पाणिनीयः। पौरवो भक्तिरस्य पौरवीयः॥ ॥जन॥ ॥एकशब्दा इति।
एतेन समानशब्दो यमेकवाचा निर्दिश्यते। प्रत्ययः प्रकृतिश्चेति सर्वशब्देन योर्थ उपात्तस्तमाचष्टे
नद्धङ्गाः क्षत्रियाः भक्तिरस्येत्यादि। अंगादिभ्यः क्षत्रियेभ्यो बहुष्वपत्येषु द्व्यञ्मगधकलिंगेत्यादि
ना विहितस्याणः तद्राजस्येत्यादिना लुक् क्रियते। बहुवचने अंगादयो जनपदिनो जनपदेन समा
नशब्दा भवन्ति। तत्र जनपदवृत्तिभ्योंगादिभ्यो यथा सोऽस्य भक्तिरित्येतस्मिन्विषये जनपदतद्वध्यो
श्चेति वुञ् भवति। तथा जनपदवृद्धिस्योपि। पंचाला ब्राह्मणा इति यदा पंचालमिवासिषु साहच
र्यात्पंचालादिशब्दा वर्तन्ते। तदा न भवति ब्राह्मणा जनपदेन बहुवचने समानशब्दाः। तद्वचनेन जनप
दिनां गतेनातिदेशाभावात् वुञेव भवति। पांचालाः। सर्वग्रहणमित्यादि। यदि सर्वग्रहणं न क्रियते २२

तथा प्रत्ययस्य विधीयमानतया प्राधान्यात् प्रधाने कार्यसंप्रत्ययात् तस्यैवातिदेशात् प्रकृतेः। तस्मा
त्प्रकृतेरप्यतिदेशो भवति। तदर्थं सर्वग्रहणं क्रियते। सर्वे स्यादि। स च प्रकृत्यतिदेशः सर्वग्रहणं द्वा
कयोरेव प्रयोजयति। न बहुषु। जनपदशब्दो नात्र वृद्धः। तस्माद्वृद्धो जनपदशब्दो दृश्यते। बहुव
चनेष्वतद्राजस्य बहुषु तेनैवास्त्रियामिति लुक्कृतेन विनाप्यतिदेशेन वृद्धोऽन एव भवतीति
तत्र प्रकृत्यतिदेशो नर्थकस्तनो नर्थकस्तत्तोने तदर्थं सर्वग्रहणं कर्तव्यम्। वृद्धिनिमित्तेष्वित्यादि
वृद्धिनिमित्तेषु वुञादिष्वादिष्टायामवृद्धायां प्रकृतौ पुनर्वृद्धिर्भावात्। प्रकृतिनिर्ह्रासेन
ज्ञानि। सर्वग्रहणाभावे तस्यातिदेशेन निर्ह्रासः अल्पनाऽपत्यय इत्यर्थः। माद्रस्तेनां च प्रकृतिम
पेक्ष्य मद्रस्यैव प्रकृतिरल्पा भवति। वाऽयं द्रस्तेनां च वृजिरिति। ननु वर्तते। सर्वसादृश्यपार्थत्वाद्
तिनिर्दिष्टानैव प्रकृतेः। अतिदेशो भविष्यतीति। नन्विं सर्वग्रहणेन। नैतदस्ति। यथैव तस्यास्य सर्व
सादृश्यार्थं वतौ न प्रत्ययार्थे देवतार्थे निर्दिश्यते। तथेहापि जनपदरूपं जनपदिनामतिदिश्यते

कस्मात्पुनस्तत्रप्रत्ययार्थेनातिदिश्यते। वतिनानयोर्निर्दिस्यप्रतिपादितत्वात्। वतिर्हिसादृश्येविधी
यते। सादृश्यंचनेहाश्रयं। यदिनवार्थस्यापिदेवनार्थतयाविपरीणामः स्यात्। तदावतिर्देशस्थान्
तस्मादन्यस्यकार्यस्यसादृश्यं। वतिनाचष्टे। प्रत्ययार्थयोस्तुतेनेदं। इहापिचतनपदतमपदिनोर्निर्दि
मात्रदृष्टमिति। असतिसर्वग्रहणेतनपदरूपंतनपदिनिनलभ्यते। तस्मात्सर्वग्रहणंक्रियते। बहुवच
नग्रहणमित्यादि। समानदेशेनायाविषयेणतस्तत्रनिर्देशणंतदर्थंबहुवचनग्रहणं। अन्यथा
हीत्यादि। यदिबहुवचनंग्रहणंनक्रियेतेत्यर्थः। तत्रैवेति। बहुवचनेबहुवचनएवतत्रार्थप्रत्यय
स्यलुकितेसमानशब्दताभवति। नतस्यतत्रैवातिदेशः स्यात्। एकवचनद्विवचनयोस्त्यादिति
तत्रसमानशब्दताया अभावात्। बहुवचनेत्वित्यादि। बहुवचनग्रहणेतुसतिबहुवचनेयेनत
पदेनसमानशब्दतास्तेषां यत्रवातत्रवातिदेशोविज्ञायमानेह्येकयोरप्यसौसिद्धोभवति॥ ॥
तेन॥ ॥प्रकर्षेणोक्तमिति प्रकर्षोतिशयः। तेनव्याख्यातंतदध्यापितंवाप्रोक्तमित्युच्यते। ननु २३

क्तमिति। ननुतेनमुख्यादिनंप्रोक्तमुच्यते। कस्मादित्याह। तनेग्रंथइतिगतत्वात्। कथंमाथुरी
त्यण्। यावताप्तृद्धाठनैवभवितव्यं। नैषदोषः। कलापिनोनित्यत्राणग्रहणस्यान्येभ्योपिभवतीत्ये
तत्प्रयोजनंवक्ष्यति। तेनमाथुरशब्दादण्एवभवति। पाणिनीयमिति। पाणिनायशब्दाहृद्धाछइति
छः। आपिशलंकाशकृत्स्नमिति। आपिशलिकाशकृत्स्नशब्दाभ्यामितिश्चेत्यण्॥ ॥तित्तिरि॥ ॥
तैत्तिरियाइति। छणप्रत्ययांतेभ्यस्तद्धीतइत्यण्। तस्यप्रोक्ताच्छुगितिलुक्। छंदोब्राह्मणानिच
तद्विषयाणीति। तद्विषयता। छंदसोत्यादि। कथंप्रत्ययंदसिलभ्यते। नहिछंदोग्रहणमस्तीत्या
ह। शौनकादिभ्यइत्यादि॥ ॥काश्यप॥ ॥णकारस्तत्ररस्वरवृद्ध्यर्थइति। अत्ररेषुयोगेषुवृद्धि
र्यथास्यात्। इहहिणकारस्यप्रयोजनंनास्ति। तस्यहिवृद्धिरेवप्रयोजनं। काश्यपकौशिकशब्दोवृद्धि
मंतौ। तस्यापिचेत्यादि। ननुचछंदोब्राह्मणादीनांतद्विषयतायुक्ता। तत्कथंकल्पस्यापिसाभवति
साद्। शौनकादिभ्यइत्यादि। स्यादेतत्। यद्यपीदंशौनकादिभ्यश्छंदसीत्यत्रानुवर्त्तते। तथापिछंदो

ब्राह्मणादीनां तद्विषयतोच्यमानकल्पस्य न सिद्ध्यत्येव। न हि सौनकादिस्वत्रानुवृत्तौ सत्यामप्यस्य
योगस्य कल्पः छंदोभावे ब्राह्मणभावमापद्यत इत्याह। छंदोधिकारविहितानां चेत्यादि। कथं पुनरि
ष्यमाणापि छंदोधिकारविहितानां तद्विषयता लभ्यते। एवमर्थं छंदोब्राह्मणानि च तद्विषयाणीत्य
त्र छंदोग्रहणं समर्थ्यते। तेन शौनकादिभ्यः छंदसीति इदं प्रकृत्य ये विहिताः प्रोक्तप्रत्ययाः। तेषां सर्वेषा
मेव कल्पादावपि तद्विषयता भवति। अपगुण कल्पनया कल्पादीनामपि छंदस्त्वं विवक्ष्यते। ननु च छं
दोब्राह्मणानि चेत्यत्र चकारस्यानुक्तसमुच्चयार्थत्वात्तेनैव प्रागेव कल्पादेस्तद्विषयता प्रतिपादिता
त्किमर्थं पुनरनेन प्रकारेण प्रतिपाद्यते। तत्र वा कल्पादेस्तद्विषयताप्रतिपादनार्थश्चकारः कर्तव्यः
अयं वा प्रकार आश्रयितव्य इति विकल्पप्रदर्शनार्थं। इदानीं तेनेत्यादि। इदानीं ततो यः काश्यपः
स काश्यपगोत्रप्रभवत्वात्काश्यप इत्युच्यते। तथा इदानीं ततो यः कौशिकः स कौशिकगोत्रप्रभव
त्वात्कौशिक इत्युच्यते। तत्र यदि ऋषिग्रहणं न क्रियेत। ततो णिनिः स्यात् ऋषिग्रहणे तु सति न भव २४

ति। कथं न भवतीति। यावता काश्यपकौशिकशब्दावपि ऋषिशब्दावेव। तथा हि प्रवराध्याये प
ठ्येते। ते ऋषय इति। इमावपि तत्र पठ्येते एव। नैष दोषः। विशेषणोपादानसामर्थ्यादियमृषिश
ब्दः क्रियाशब्दो विज्ञायते। ऋषिर्दर्शनादिति। तेन यावन्नान्यपुरुषसाधारणेनोपदेशिकेन दर्श
नेन तद्वंतौ काश्यपकौशिकशब्दौ। तत इदं प्रत्ययविधानं। न चेदानीं ततौ काश्यपकौशिकशब्दा
वेवं विधौ ताभ्यां छ एव भवति॥ ॥कला॥ ॥अभिधानेभिधेयोपचारात्। कलापिवैशंपायनां
तेवास्यभिधायिनः शब्दा इह कलापिवैशंपायनांतेवासिशब्देन निर्दिष्टाः। अत एवाह। कला
प्यंतेवासिनामिति। ननु च ये व्यवहिताः शिष्यशिष्याः ते कलापिवैशंपायनांतेवासिन एव नवं
ति। तदयुक्तमुक्तं। कलाप्यंतेवासिनश्चत्वारः। वैशंपायनांतेवासिनो नवेत्याह। प्रत्यक्षकारिण इ
त्यादि। करोतिरत्राध्ययने वर्त्तते। यैः साक्षादधीतं ते प्रत्यक्षकारिण इहांतेवासिनो गृह्यंते। ते चै
तावंत एवेति। किमत्रायुक्तं। कुत इह साक्षात्कारिणो गृह्यंते। न हि व्यवहिता इत्यत्र हेतुं पठति

कलापिखांडायनग्रहणं हितिहेतुनिर्देशः। तथा चेत्यादि। अस्यैव विवरणं। वैशंपायनस्य कलाप्यं-
तेवासिनस्तस्यैवांतेवासिनस्तैर्वैशंपायनांतेवासिनो न्वबंस्येव। तत्र ये यद्व्यवहितमप्यंतेवासिनो गृ-
ह्येरन्। कलापिग्रहणमनर्थकं स्यात्। वैशंपायनांतेवासिभ्य इत्येवं ब्रूयात्। तथा वैशंपायनांतेवा-
सी कठः कठांतेवासी खांडायनः। तत्र यद्व्यवहिता अपि गृह्येरन्। ततो वैशंपायनांतेवासित्वाद-
नेनैव सूत्रेण सिद्धे शौनकादिषु खांडायनमपि साक्षात्कारिग्रहणस्य लिङ्गं ज्ञापकम्। हारिद्रवि-
ण इत्यादि। हरिद्रुप्रभृतिभिः प्रोक्तार्थे णिनिः। तदंतात्तदधीते तद्वेदेत्यण्। तस्य प्रोक्ताल्लुक्
अयं च योगश्छंदोधिकारमनुवर्त्तते। तेन तद्विषयता न भवति। उलपेन चतुर्थेनेति सहार्थे तृती-
या। कालापकमिति। कलापिन इदं कालापकं। गोत्रचरणाद्वुञ्। ननु च धर्माम्नाययोर्वुञ्। न चेमे
शिष्या धर्माम्नायाः। तत्कथं वुञ् एवं तर्ह्युपमानाद्भविष्यतीति। कालापकमिव धर्मवद्धिष्या उ-
च्यंते। यथा धर्माः कलापिसंबंधितया शिष्या इत्युच्यते। उपमानार्थः। आलंबस्याः कः प्राचामिति २५

आलंबिर्नाम प्राचां देशः। तत्रोत्पन्नश्च कारकः। एवं पलंगकमलाद्वुञो। प्राचामेवात्रय एव प्राच्याः। वैश-
म्पायनशिष्याः। ऋचा आरुणिना एउद्यासश्च मध्यमीयास्त्रयो परे। चरका मध्यदेशे भवा मध्यमीयाः। गहा-
दिषु मध्यममध्यमीयत्वाच्चरण इति पठ्यते। तस्यायमर्थः। मध्यमशब्दो मध्यंमापद्यते। छप्रत्ययश्च ततो भ-
वति। चरणे तु प्रत्ययार्थे अण् एव भवतीति। तत्र यदा स्कुवाच्यावादीनां चरणत्वं न विवक्ष्यते। तदा छेनते
मध्यमीया इति भवति। चरणविवक्षायां तु अणि कृते माध्यमा इति भवति। उदक्तु भवा उदीच्याः। द्यु-
प्रागपागित्यादिना यत्। उदीच्येषु मध्ये श्यामायनिश्चरकः। कठकलापिनावप्रदीच्येषु चरकौ। तयोरु-
क्तं। कठकलापिनोः किमुक्तं। एकस्य तावदुक्तं। कठचरकाल्लुगिति। अपरस्याप्युक्तं। कलापिनोऽणिति।
ननु च वैशंपायनांतेवासिनां कठैनैव चरक इत्येषाख्या। तत्कथं चरक इत्युच्यत इत्याह। चरकवैशम्पा-
यनस्येत्यादि। यद्यपि तेषां चरक इत्याख्यानं न भवति। तद्गुरोस्तु वैशम्पायनस्य भवति। तत्संबंधेन तच्छिष्या
अपि तथोच्यंते॥ ॥पुराण॥ ॥भाल्लविन इत्यादि। भल्लवशाट्यायनऐतरेय इत्येतेभ्यः प्रोक्तार्थे णि-

निः। तदर्हंता॥ धीते कल्पसूत्रस्य प्रोक्ताध्युक्। छंदोब्राह्मणानीत्यादिना तद्विषयता। पैंगी आरुणपराजीनि
पिंगारुणपराजब्राह्मणाभ्यां णिनिः। याज्ञवल्क्यानि। आश्मरथ इति। याज्ञवल्क्या आश्मरथ्यब्राह्मणान्यो गर्गा
दियर्षिताभ्यां कण्वादिभ्यो गोत्र इत्यण्। आपत्यस्येत्यादिना यलोपः। ननु याज्ञवल्क्यादीनपि पुराणप्रो
क्तान्येव ब्राह्मणानि। ब्राह्मणानां तेषां पुराणप्रोक्तत्वादित्याह। याज्ञवल्क्या इत्यादि। आख्याने पुले
षाचार्या याज्ञवल्क्यादयोऽपरकालाः प्रवक्तारोऽन्येभ्यः प्रवक्तृभ्यः। तेषां च बहुत्वमनपेक्ष्य व्यवहरति
सूत्रकारः इत्यदोषः। तद्विषयता कस्मान्न भवति। छंदोब्राह्मणानीत्यादिनेति भावः। प्रतिपदमित्या
दि। लक्षणप्रतिपदोक्तपरिभाषया हि प्रतिपदं विशेषणं ब्राह्मणग्रहणमुच्चार्य ब्राह्मणेषु यः प्रत्ययो विहि
तः। तस्य तद्विषयता विधीयते। तस्मान्न तद्विषयतास्य न भवति। कल्पेषु तर्हि कस्मान्न भवति। यथा काश्य
पेन प्रोक्तं कल्पमधीयते काश्यपिन इत्यत्रेत्याह। न चायमित्यादि। छंदोधिकारे ये योगास्तद्विहितस्य प्रत्य
यस्य तद्विषयता भवति। न चायं योगः छंदोधिकारमनुवर्त्तते। तेनैतद्विहितस्य प्रत्ययस्य अध्येतृविष २६

यता कल्पेषु न भवति। पैंगी कल्पः आरुणपराजी कल्प इति। पुराण इति कोयं शाट्यायनावतासायं चिर
मित्यादिना ट्युट्युलोः संनियोगे तुट्कृते पुरातनमिति। नवितव्यमित्यत आह। पुराण इति निपा
तनात्तुडभावः। यद्येवं न भवति पुरातनमित्याह। न चेत्यादि। ननु बाधकान्यपि निपातनानीत्यतो न वि
नष्टमेव बाधकेनेति। अबाधकान्यपि बाधकान्यपि भवंति। एतच्च शादेरगतोतटइति प्रतिपादितं॥ ॥ ॥
शौन॥ ॥ छागेरपवाद इति। ये वृद्धास्तेभ्यश्छस्यापवादः। शेषे त्वण्। शौनकिनः। वाजसनयि
न इति। शौनकेन प्रोक्तं वाजसनेयेन प्रोक्तमिति णिनिः। तदधीत इत्यण्। तस्य प्रोक्ताध्युक्। सर्व
वत्र तद्विषयता। केवलाद् इत्यादि। तत्संदृतार्थमित्यत्रायं हेतुः। यस्मात्केवलात्कठाच्छुकं चरत्येति। तस्मा
त्कठचरादित्ययत्सूत्रपठितो। ते संदृतार्थे॥ ॥ कठचर॥ ॥ कठाच्चरकादिति। प्रोक्तप्रत्ययस्य लुक्किल
तो। योऽध्येतर्यण् भवति। तस्यापि प्रोक्ताल्लुक्। सर्वत्र तद्विषयता॥ ॥ कलापि॥ ॥ कालापा इति॥
सर्वत्र प्रोक्तप्रत्ययानां। अध्येत्युत्पन्नस्याणो लुक्। तद्विषयता च। अणेत्यादि। ननु चास्मत्यणस्त्रद्दणे

यथाप्राप्ते विधीयमाने णिनिरेवापवादः स्यात्। नैतद्दृष्टम्। एवं हि वचनमनर्थकं स्यात्। तस्माद्योवि
हितो न च प्राप्नोति। अनेन बाधितत्वात् सत्यवचनं विध्यति। स चाणेव। एवमादीन्यादिशब्देन मोदाः
पैप्पलादाः शाकला जाजला इत्येतेषां ग्रहणम्। असति त्वण्ग्रहणे सर्वमेतन्न सिध्येत्। तद्बह्वछ इति लि
नाण्। औ। सर्गिकस्य बाधितत्वात्॥ ॥छगलि॥ ॥छागलेयिन इति। इहापि पूर्ववदेव अध्येतृषु
तस्याणो लुक्। तद्विषयता च। एवमुत्तरयोरपि योगयोर्वेदितव्यम्॥ ॥पारा॥ ॥यथासंख्यमिष्य
ते। पाराशर्यादि भिक्षुसूत्रे प्रत्ययः। शिलालिनो नटसूत्रे। तद्विषयता चात्रेष्यत इति। कथं पुनरिष्य
माणापि लभ्यत इत्यत आह। तदर्थमित्यादि। ननु चानुवर्तमानं छन्दोग्रहणे नैव तद्विषयता प्राप्नो
ति। भिक्षुनटसूत्रयोरछन्दस्त्वादित्याह। गुणकल्पनया चेत्यादि। छन्दस्त्वोपचारनिमित्तं यो धर्मः सह
गुणो विवक्षितः। तद्द्वारका कल्पना यथा छन्दो यदर्थमधीयते। तद्वत्तं संपादयति। तथा सूत्रमपि
भिक्षुनटाय विद्येवमादिकया गुणकल्पनया भिक्षुनटसूत्रयोश्छन्दस्त्वमौपचारिकं। पाराशा २१

रिण इति। पाराशर्यशब्दो गर्गादिषु यञन्तः। आपत्यस्य च तद्धितेनाती यलोपः। शैलालिन इ
ति। तस्माद्धितेति टिलोपः। पाराशरमिति। कण्वादिगोत्र इत्यण्। शैलालमिति। औत्सर्गिकोऽण्। एत
न्तस्य टिलोपे सब्रह्मचारिपीठसर्पीत्यादिना टिलोपः॥ ॥तेन॥ ॥तेनेति तुल्यार्थैर्वतीलोपमात्र
मिति तृतीयासोऽदाममनीति। अन्विति प्रश्ने तिनावादिलोपाभावः नतु च तेनेति प्रश्नतमेव। नत्कि
मर्थं पुनरिह तृतीयासमर्थविभक्तिरुपादीयत इत्याह। तेनेति प्रश्नेन इत्यादि। पूर्वं हि तेनेति छन्दो
धिकारसंबद्धमेतत्तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात्। तस्माच्छन्दोधिकारनिवृत्तये पुनरिह तृती
यासमर्थविभक्तिरुपादीयते। किमर्थं पुनश्छन्दोधिकारः पूर्वत्र निवृत्त इत्याह। पूर्वसूत्र इत्यादि
पूर्वं त्रियोगेषु छन्दोधिकारात् तद्विषयता साध्यते। तस्मात्तत्र छन्दोधिकारः कर्तव्यः। न त्वस्मिंस्तु क्रिय
माणे तन्निवृत्त्यर्थं इदं नयपत्र आस्थेयः। अन्यथेह छन्दस्येव प्रत्ययः स्यात्॥ ॥उप॥ ॥अकालकमिति
कालपरिमाणारहितं इत्यर्थः॥ ॥कृते॥ ॥कैः पुनः कृतोपयज्ञा तयोर्विशेषो येनोपज्ञात इति। प्र

कृते सति तन्न ग्रहणं क्रियत इत्याह। उत्पादितमित्यादि॥ ॥त्सुञ्॥ ॥स्वरे विशेष इति। अलिङ्गि
प्रत्ययस्वरेणांतोदात्तत्वं स्यात्। अञि तु सति ञित्स्वरेणाद्युदात्तत्वं भवति॥ ॥तस्येदम्॥ ॥तस्ये
ति यदि पुंल्लिंगेनायं निर्देशः पुंस्येव स्यात्। न द्विवचनबहुवचनांतात्प्रत्ययवाचिनश्च न स्यात्।
नापि विशेषवाचिनः। न ह्यस्य परोक्षवस्तुमात्रवाचित्वात्प्रत्ययार्थोयमिदमित्येकवचनेन नपुं
सकलिंगेन निर्दिष्ट इत्येकस्मिन्नर्थे स्यान्नपुंसक एव नान्यत्र। परोक्षेन स्यात्। इदमः प्रत्यक्षवाचित्वा
त्। अन्येन सर्वमाशंक्याह। प्रकृतिप्रत्ययार्थौ रित्यादि। प्रकृतौ षष्ठ्यर्थमात्रं विवक्षितं प्रत्ययार्थे
पि षष्ठ्यर्थसंबंधिमात्रं येन विना षष्ठ्यर्थो न संपद्यते। यदपरमित्यादिना मात्रशब्देन यद्व्यवच्छि
न्नं तद्दर्शयति। आदिशब्देन सामान्याभिधायित्वं गृह्यते। अस्य तु सर्वत्र विवक्षाकारणं न स्या
पत्यमित्यत्रैवोक्तं। अथेह कस्मान्न भवति। देवदत्तस्यानंतरं देवदत्तस्य समीपमित्यादि। अन
भिधानादिति। प्रत्ययांतेनानंतरादीनामप्रत्यायनमित्यर्थः। संबद्धेत्यादि रिति। वहेस्त्रं तादित्यर्थः। सा २८

वहित्रमिति। संहर्षाद्वहरूढिरिच् वचमणादेशः। सहुरेवात्राणीति। प्राग्दीव्यतोणित्यनेन। यद्ये
वं किमर्थमुपसंख्यानमित्याह। इडर्थमित्यादि। उपसंख्याने वसतीडागमो न स्यात्। एकाच
उपदेशेनुदात्तादिति इट्प्रतिषेधात्। अग्नीधइत्यादि। अग्नीधइत्येतस्मात् शरणेग्रदेवाचेर
ञ्नक्त्व्यः। नसंज्ञा च वक्तव्या। न संज्ञायां च सत्यां पदत्वाज्जश्त्वं न भवति। समिधामित्यादि। आ
धीयंते येन मंत्रविशेषेण समिधः तस्मिन्समिधामाधाने विशेषे समिद्धाधानषेण्यण् प्रत्ययो व
क्तव्यः। व्याख्येयः। व्याख्यानं तु हविर्निवासन्नामिधेनी। छित्ये तन्निर्देशमा। श्रित्य वक्तव्यं। सामिधे
नीति। षिड्डोरादिभ्यश्चेति ङीष्। हजन्नद्धितइति यलोपः॥ ॥रथाद्य॥ ॥नान्यत्रेति सन्नाहा
दौ॥ ॥पत्रात्॥ ॥पत्राद्वाह्ये इति। अवधारणमत्र द्रष्टव्यं। पत्राद्वाह्य एवेति। अन्यत्र कस्मा
न्न भवत्यनभिधानात्। अथ किमर्थं श्विर्वेणसहैकयोगएवं क्रियते। पत्रस्यर्षपत्राध्वर्युपर्षदोरि
ति नित्यैवं शाक्यं। एवं हि श्वपत्रप्रवृत्ति निपदिकान्। अन्यतो पि प्रसज्येत। योगविभागे स्वर्वस्मि

रथांगे रथ्यादिष्वनुवृत्तेः रथ एव पत्रपूर्वग्रहणेन विशेष्यत इति न भवति अतिप्रसंगः। एकयोगे तु
रथाद्यनुवृत्तौ सत्यां यथा पत्रपूर्वतया रथो विशेष्यते। तथा पत्रादिभिरपि रथ एव विशेषित इति
योगविभाग एव न्याय्यः॥ ॥हूंहूंत॥ ॥बाभ्रव्यशालंकायनिके निवृत्तं। स्वभावादेव स्त्रियां व
र्त्तत इति टाप् प्रत्ययस्थादित्यादिनेत्वं॥ ॥गोत्र॥ ॥वुनि प्रकृते वुञ्विधानं वृद्ध्यर्थं तच्चारवृद्धाए
व गोत्रचरणशब्दाः प्रयोजयंति। न वृद्धास्तेषु हि वुञि वुनि वा सति न कश्चिद्विशेषः। ग्लौचुकायनक
इति। प्राचामवृद्धात्फिन् बहुलमिति फिन्। नटं नाडुञ्चरणादित्यादि। चरणशब्दः धर्माम्नाययोर्वर्त
ष्यते। नाम्नत्वानाभिधानादिति॥ ॥संघां॥ ॥नेन वैषम्याद्यथासंख्यं न भवति। असति तु घोष
ग्रहणे अणादयस्त्रयः संघादयोऽपि त्रय इति साम्याद्यथासंख्यं स्यात्। घोषे च प्रत्ययो न स्या
त् वेद इति। अनुष्य इत्यादिना। नटं तादृग्। अंकलक्षणयोः को विशेष इति। नास्त्येव कश्चिद्वि
शेषः। पर्यायत्वादंकलक्षणयोरिति मन्यते। लक्षणमित्यादिना विशेषं दर्शयति। लक्षणं चिह्नं २८

लक्ष्यस्यैव स्वं नान्यस्य। यथा विद्याविदानां हि विदानामेव। लक्षणं संबंधिनां नान्यस्य कस्यचित्
अंकस्तु गवादिस्थो न गवादीनां स्वं भवति। किं तर्हि तेनोन्येषां। गवादिस्वामिनां। अथ किमर्थं णित्करणं
प्रत्ययस्य। यावता अंताद्यंताः प्रकृतयो वृद्धा एव तत्र आह। णित्करणमित्यादि। वैदी विद्येत्यत्र निवा
ताङीप् यथा स्यात्। इह च वैदी विद्या इत्यत्र वृद्धिनिमित्तस्य तद्धितस्यारक्तविकार इति पुंवद्भावप्रति
षेधो यथा स्यादित्येवमर्थं णित्करणं न वृद्ध्यर्थं॥ ॥शाक॥ ॥वुञोपवाद इति। चरणलक्षणस्यस्य
शाकलशब्दस्य चरणलक्षणत्वात्। शाकला इति। शाकल्यशब्दाद्गर्गादियञंतात्कण्वादिभ्यो गोत्र
इति प्रोक्तार्थेऽण्। आपत्यस्य च तद्धितेनाति यलोपः। शाकल इति स्थिते। तदधीते तद्वेदेत्यण्। तस्य प्रो
क्ताल्लुक्। शाकलानां तेषां संघः शाकलः शाकलक इति वा॥ ॥छंदो॥ ॥वुञणोरपवाद इति। छंदोगा
दिभ्यश्चरणलक्षणस्य वुञोपवादः। नटाद्योत्सर्गिकस्याणः॥ ॥नदंड॥ ॥दंडप्रधाना माणवा दं
डमाणवा इति मध्यपदलोपं समासं दर्शयति। स पुनर्मयूरव्यंसकादित्वाद्द्रष्टव्यः। मयूरव्यंसका

देशात्त्विगणत्वात्। वुञ्ञस्यापि न भवतीति। एतेन वुञोयं प्रतिषेध इति दर्शयति। कथं पुनर्ज्ञायते।
वुञोयं प्रतिषेध इत्याह। गोत्रग्रहणमित्यादि। इह हि गोत्रग्रहणमनुवर्त्तते। गोत्रचरणाद्वुञित्यतः
तेनायमर्थो भवति। तस्येदमित्येतस्मिन्नर्थे यः प्रत्ययो गोत्रात्प्राप्नोति स दंडमाणवांतेवासिषु न भ
वतीति। गोत्राद्वुञेव प्राप्नोतीति। अतस्तस्यैवायं प्रतिषेधो विधीयते। गोकक्षाशब्दाद्गर्गादियञन्ता
त्कण्वादिभ्यो गोत्र इत्यण्। सर्वत्र यञ्लोपः। दाक्षा इति। दाक्षिशब्दादिमाह किन्य इञश्चेत्यण्॥ ॥
रैवति॥ ॥पूर्ववदिति। गोत्रचरणाद्वुञित्यनेन रैवतिकीयमिति। रैवत्या अपत्यमिति। रैवतिकः॥
ततः छः॥ स्वापिशीयमिति। स्वापिशिशब्दादिञन्तात् छः॥ अथ छग्रहणं किमर्थं। नो ननु तस्मात् द्वि प्रतिषे
धे नुनक्षिष्यते। तत्र रैवतिकादिभ्यो वुञित्यतिदिष्टे वृद्धत्वादेषां छ एव भविष्यति। नवेक्सिद्धं यत्र छ
स्यापवादो नास्ति रैवतिकीय इति। येत्वत्र भयंतः पठ्यंते। स्वापिशि अदबापिरित्येवमादयस्तेभ्य
इञश्चेत्यण् प्रसज्येत। तस्मात् छग्रहणं कर्त्तव्यं। अथ कथं वृद्धिशब्दोत्र कस्मात्पठ्यंते। यावता गृहा ३०

दिरसौ गृहादित्वात् छ एव न भविष्यति। न सिध्यति गृहादिपाठस्य अन्यस्तद्धितार्थो विकाशः। इदमर्थे तु
परत्वाद्वुञेव स्यात्। तस्मादिदमर्थे तु स्यादिति युक्तस्तस्येह पाठः॥ ॥कोपिं॥ ॥गोत्राधिकारा
दिति। गोत्रवुञोपवाद इत्यत्रायं हेतुः। अत्र हि गोत्रग्रहणेऽधि क्रियमाणे कोपिंजलहास्तिपदश
ब्दाभ्यां गोत्रवाचकाभ्यामण् विधीयते। स च नाप्राप्ते गोत्रवुञीति। तेन तस्यैवापवादो विज्ञायते। को
पिंजल इति। कपिञ्जलस्यापत्यमित्यनेनस्मादेव निपातनादण्। तदन्तात् कोपिंजलस्येदमिति पुनरण्।
हास्तिपद इति। हस्तिन इव पदान्यस्येति। हस्तिपादस्यापत्यमित्यस्मादेव निपातनादण्। पादस्य पद्
भावः। हास्तिपदस्येदमिति पुनरनेनाण्। अथाण्ग्रहणं किमर्थं। न यथाविहितमेवोच्येत। ननु चै
वं गुरुत्वाद्वृद्धाट्ठः स्यात्। नैतदस्ति। यद्येनाभ्यां छोपि छः स्यात्। रैवतिकादिषु पुनरुत्पद्येयातां॥
रैवतिकादिस्वरूपग्रहणमुपादानात्। विज्ञायते। नैताभ्यां छो भवति। वुञ् तर्हि स्यात्। नैतदस्ति। आरंभो
ऽप्येवमनर्थकः स्यात्। गोत्रादित्येव वुञः सिद्धत्वात्। नानर्थको यत्रासौ प्रतिषिध्यते तत्रारंभस्य सार्थ

र्वकत्वात्। क्व चासौ प्रतिविधीयते। न दंडमाणवांतेवासिषु तस्मात् दण्डग्रहणं कर्त्तव्यं। णिच्करणं कौ
पिञ्जली क्लिये तिङीप् यथा स्यात्। इह च कौपिञ्जली क्रियास्य कौपिञ्जली कि यइति। वृद्धिनिमि
त्तस्य न द्वितस्या। रक्तविकारइति पुंवद्भावप्रतिषेधो यथा स्यात्॥ ॥आथ॥ ॥चरणेभ्यो ओपवार्
इति। आथर्वणिकस्य चरणत्वात्। आथर्वणइति। अथर्वणा प्रोक्तमित्यण्। अन्तिनि प्रवृत्ते निमा
वः। अथर्वणइति स्थिते। अधेतरितद्वेदइत्यनुवर्त्तमाने वसंतादिभ्यष्ठक्। आथर्वणिकाः। अत एव निपा
तनात् प्रोक्ताद्युगितिलुग्नभवति। चरणाद्धर्माम्नाययोरिति पूर्वोक्तमिति संस्मारयति॥ ॥तस्य॥ ॥प्रकृ
तेरवस्थांतरमिति। प्रकृतेः कारणस्यावस्थांतरमन्यथात्वं। अश्मणीति। प्राणिनः प्राणिरजतादिभ्योऽञ्
वक्ष्यति। आद्युदात्तमिति। अनुदात्तादेश्चेति अञं वक्ष्यति। अहृद्यमिति। वृद्धाच्छमटं वक्ष्यति। नित्यं वृद्ध
शरादिभ्यइति। यस्य चनान्यत्र निपदविधानमिति। गोपयसोर्यदित्येवमादि। ननु चान्तिनि प्रवृत्तेनि
त्वेन भवितव्यं। तत्कथमाश्मइति भवतीत्याह। अश्मनो विकारइति टिलोपइति। टिलोपार्थमश्मनो ३१

विकारइत्येतदुपसंख्यानं कृतं। नित्स्वरेणाद्युदात्ता एतइति। अश्मादयः शब्दाः। तत्राश्मन्नश्मशब्दो मनि
न् प्रत्ययांतत्वान्नित्स्वरेणाद्युदात्तो। मृत्तिकाशब्दोपि तिकन्प्रत्ययांतत्वात्। मृदस्तिकन्निति। अयन्तस्येति
वचनं किमर्थं। यावता तस्य ग्रहणं प्रकृतमेवेत्याह। तस्यप्रकरणमित्यादि। नहि प्रकृतं तस्येति वचनम्॥
शैषिकेष्वादिभिस्संबद्धमतस्तदनुवृत्तौ तत्प्यनुवृत्तेरेव। अस्मिंस्तु तस्य ग्रहणे क्रियमाणे पूर्वकं त
स्येति वचनं निवर्त्तते। तस्मात् प्रकृतेपि तस्येति वचने शैषिकनिवृत्त्यर्थं पुनस्तस्येत्युच्यतइति। ननु च प्रधा
नं ह्यादयः विधीयमानत्वात्। तस्येति तु वचनमप्रधानं तदर्थत्वात्। तत्राप्युक्तः गुणे निवर्त्तमाने प्रधानस्य नि
वृत्तिः। प्रधानवृत्तिर्हि गुणो भवति। न गुणार्थवृत्तिः प्रधानं। नैष दोषः। तस्येति वचनसामर्थ्याद प्रधान
स्यापि गुणनिवृत्तौ निवृत्तिर्भवतीति। अन्यथा हि तस्येतिवचनमनर्थकं स्यात्। अणादीनामपि तर्हि निवृ
त्तिः प्रसज्येत। यद्येव हि प्रकृतं तस्येति वचनं ह्यादिभिः संबद्धं। तथाणादिभिरपि। नैष दोषः। उभयेषां नि
वृत्तौ हि निःफलः सूत्रस्यारंभः स्यात्। विधेयस्य कस्यचिदभावात्। तस्मात् प्रत्ययानामेषां निवृत्तिः। ननु चा

र्त्तसामर्थ्यादुभयेषामन्यतरेषां निवृत्तिरित्येतावद्विज्ञायते। तत्किं घादयो निवर्त्तंते उत अणादयः। सेदं द्वयए
वासंदेहमात्रमेतत्। सर्वसंदेहेष्विदमुपतिष्ठते। व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमि
ति घादयो निवर्त्तंत इत्येवं व्याख्यास्यामः। स्वरितत्वादणादीनामनुवृत्तिर्भविष्यति। ननु चास्वरितत्वात्
घादीनामननुवृत्तिः सिद्धैव तत्कस्येति वचनेनाख्यायते। शैषिकनिवृत्त्यर्थं। विकारावयवयोरित्यादिनावि
शेषं दर्शयति। केन पुनर्विकारावयवयोर्घादयः प्राप्नुवंति। तस्येदमित्यनेन। तस्येदं विशेषत्वात्तयोः।।
हालसेर इति। यदि शैषिका अनुवर्त्तेरन् ततो हलसीराट्ठाभ्यां हलसीराट्ठगिति ठक्स्यात्। तन्निवृत्तौ
त्वणेव भवति।। ।।अवयवे।। ।।मौर्वं कांडमिति। मूर्वाशब्दादवयवे प्रत्ययः। मौर्वं भस्मेति विकारे। इ
तउत्तरं इत्यादिना वक्ष्यमाणानां प्रत्ययानां विषयविभागं दर्शयति। कथमिति। केन प्रकारेणायं विभा
गो लभ्यते। प्रस्तुतमर्थं पृच्छति। द्वयमपीत्यादि। यतो हेतोरेष विषयविभागो लभ्यते तद्दर्शयति। तत्र
फलपाकांता ओषधयः। पुष्पवंतश्च फलवंतश्च वृक्षाः। तद्विशेषा वनस्पतयः फलवंत एव। न पुष्पवंतः ३२

तत्र वनस्पतिग्रहणेन वृक्षविशेषास्ततोन्येन गृह्यंते। वृक्षग्रहणे तु वनस्पतेरपि ग्रहणं विज्ञेयम्
विकारावयवयोरित्यादि। युगपदधिकारे अणादीन्वक्ष्यामीत्येवमर्थो युगपदधिकारः। अणादीनाम
पि निर्दिष्टार्थोपि कस्मान्न भवतीत्याह। अनिर्दिष्टौ हिताविति। ननु निर्दिष्टौ हितावर्थौ तस्येदमित्यने
नैवात्। तस्येदं विशेषत्वात्तयोः।। ।।बिल्वादि।। ।।अनमयटोपवाद इति। यस्त्वत्रानुदात्तादिस्तस्मादनु
दात्तादेश्चेति प्राप्तस्याञोपवादः। यत्तु वृद्धं ततो नित्यं वृद्धशरादिभ्य इति मयट्। तत्र बिल्वशब्दस्य प्राति
पदिकस्वरेणांतोदात्तत्वे प्राप्ते बिल्वलिष्पयोर्वा तत्त्वः स्वरितत्वमिति स्वरितत्वं भवति। उदात्तो वा। व्री
हिमुद्गशब्दौ घृतादित्वादंतोदात्तौ। मसूरगोधूमशब्दौ लघावंते द्वयोश्च बह्वषो गुरुरिति मध्योदा
त्तौ। एवं गवेधुकाशब्दोपि। इषेः मुः इक्षुः प्रत्ययस्वरेणांतोदात्तः। वेणुशब्दोपि विभाषा वेण्विंधान
योः प्रत्ययेऽतोदात्त एव। कर्पासी पाटलीशब्दौ जानेरस्त्रीविषयाद्योपधादिति ङीषंतौ ङीषः प्रत्य
यांतत्वान्ङीषप्रत्ययस्वरेणांतोदात्तौ। कर्कंधूशब्दो। अंहहत्तूजं तु नसस्कफेनतु कर्कधूरिति धरिति

निपातनान्मध्योदात्तः। कुटीरशब्दोऽप्येवं इत्यादिनामध्योदात्ताः। सर्व एते अनुदात्तं पदमेकवर्जमि
त्यनुदात्तादयः तेनात्र बाधनार्थं ग्रहणमिति। अथाण्ग्रहणं किमर्थं न। बिल्वादिभ्योण यथाविहितमे
वे[illegible]ते नैवं शक्यं। पाटलीशब्दो यत्र वृद्धः पठ्यते। तस्मादत्रो बाधके मयट्प्राप्ते पुनर्वचनादेते
वस्यात्। अण्ग्रहणं त्वणेकवति। तस्मादण्ग्रहणं क्रियते॥ ॥कोपधाच्च॥ ॥यथायोगमिति
प्राण्योषधिवृक्षेभ्यो विकारावयवयोः। अस्मिन्सूक्ते विकारमात्र इत्येषयथायो गार्ग्यः। अत्रोपवा
द इति। अस्यान् अनुदात्तादेश्चैतान्यां प्राप्तस्यानित्रलीकमाइकदर्द रूकमडुकशब्दाप्येवं इत्या
दिनामध्योदात्ताः। ते नानुदात्तादयो भवंति॥ ॥उत्र॥ ॥अत्रोपवाद इति। अनुदात्तत्वात्॥
अप्रामाण्यपादीति। आदिशब्देनोषधित्वमरहत्वंच गृह्यते॥ ॥ऊरक्॥ ॥अनुदात्तादेरस्य
द्विहोदाहरणमिति। अनुदात्तादेरकन्नरस्यत्रेणैव सिद्धत्वात्। देवदारवं नाद्रदारवमिति। देवदारु
नद्रदारुशब्दो पीतद्रूर्वानामित्याद्युदात्तौ। तस्यायमर्थः। पीतद्रुरर्थो येषांते पीतद्रूर्वाम्नेषांपीतद्रु ३३

र्यवचनानामादिरुदात्तो भवति॥ ॥अनु॥ ॥दधित्थमित्यादि। दधिनिष्ठतीति कपोतिष्ठती
तिसुपिस्थ इति कः। आतोलोप इत्याकारलोपः। पृषोदरादित्वात्सकारस्य तकारः। उपपदसमासः
समासस्वरेणांतोदात्तो। तेन दधित्थकपित्थशब्दौ अनुदात्तादी न भवतः॥ ॥पलाश॥ ॥उभ
यत्र विनाषेयमिति। प्राप्तेवाप्राप्तेवा। नामेवो भयत्र विनाषोस्य षष्ठीकर्तुमाह। पलाशखदिरेत्या
दि। पलाशशब्दो घृतादित्वादंतोदात्तः। खदिरशब्दो पि विस्वरेण तर्ह्यसौ विदमिति मुखस्व
दिमादीत्याद्यनुवर्त्तमाने अजिरशिशिरशिथिलस्थविरखदिरा इतिकिरच्प्रत्ययांतो निपातितः। शिं
शपाशब्दः पांतानां गुर्वादीनां इतिमध्योदात्तः। तस्यायमर्थः। पाशब्दांतानां गुर्वादीनां द्वितीयं
उदात्तं भवति। अथ द्वितीयं प्रागीषादेरनुवर्त्तते। स्पंदि किंचिच्चलने। अस्मादनुदात्तेत्वं हला
दे[illegible]तनयुच्। स्पंदनं। चित्स्वरेणांतोदात्तः। लघावन्त इत्यामीरन्करीरशब्दो निस्वरेणाद्युदात्तः। लघ
ईषन्तास्य ह्रस्वां किंचेति शिरीषशब्दोपि निस्वरेणाद्युदात्तः। विकंकतफलाशब्दायबीशायामादी

वेत्याच्छादनः॥ ॥ग्राम्याः॥ ॥अन्नोपवाद इति। ग्रामीणाद्युस्य गोत्रादित्वान् ङीषं न न्यस्य प्रत्य
यस्वरेणांतोदात्तस्यानुदात्तादित्वात् टकारो ङीबर्थः॥ ॥मयट्॥ ॥एतयोरिति। किमनेनेत्या
हिताद्युये विशेषप्रत्यया इति परिहारः आदिशब्देन उष्ट्राद्वुञित्येवमादयो गृह्यंते। यदि चेन
योरिति सेत्येन ततो यद्यत उत्तरविशेषाः प्रत्ययास्तत्रादयस्तेम ह संप्रधारणायां परत्वात्त एव
स्युः एतयोरिति कृत्यमाने तु विशेषप्रत्यये प्यपि पक्षे भवति तेन कपोतमयमित्यादि सिद्धं भवति॥
अपरत्वियमाण एतयोरित्येतस्मिन्क्रियमपवादविषये मयड् भवति एतयोरित्यस्य विधानार्थत्वात्
मयट्प्रत्ययो विकारावयवयोर्भवति। एवं विधानं। एतयोर्मयड् भवतीति द्वितीयं तत्र यद्येन द्विती
यं विधानं। तदा प्रापणार्थं तेन यत्रापि विशेषप्रत्ययैर्बाधितो मयट् न प्राप्नोति। तत्रापि भवति। अ
पवादग्रहणं किमर्थं यावतोत्तरसूत्रे नित्यग्रहणादेवेह विभाषा विज्ञायते। नैतदस्ति। नित्यश
ब्दो ह्याभीक्ष्ण्येप्यस्ति। नित्यप्रहसितो नित्यप्रजल्पित इति। प्राधान्येन च भवनमात्रे लक्षणं भवति। इति ३८

वृद्धशरादिलक्षण एव मयट् नित्यः स्यात्। अयं तु नित्यः। इह तु वाग्रहणे सति नित्यग्रहणं तत्र नि
त्येनान्यनिवारणेन भवतीत्येषोऽर्थो विज्ञायते। तस्माद्वाग्रहणं कर्तव्यं॥ ॥नित्यं॥ ॥प्राग्दीव्य
तीयाणो ह्यपवादो मयडारभ्यते अणं तु कोपधलक्षणं। अञ् मुपवर्णांतलक्षणं। अनुदात्तादि
लक्षणं च परत्वाद्बाधते। आरंभसामर्थ्यादेव नित्यं भविष्यतीति। यदि च नित्यः स्यात् अस्य स्व
रूपस्यारंभोऽनर्थकः स्यात् पाक्षिकस्य मयटः पूर्वेणैव सिद्धत्वात्। तदनेन क्रियत इति यत्तदेतदेषा
मस्वार्याणामिष्टं तदनेन नित्यग्रहणेन सफलं क्रियत इत्यर्थः। कथं। योगविभागः क्रियते। तद्य
था द्वारं द्वारमिति शाब्दाधिक्यादर्थाधिक्यं न भवतीति। नित्यग्रहणेनायमर्थः सूच्यते। यद्येवं नि
त्यग्रहणादेव मृच्छब्दादपि नित्यो यं मयट् सिद्धः पतदपार्थकोऽस्य शरादिषु पाठः। नोनर्थकः। नि
त्य दृष्टांतस्यैवोदाहरणप्रदर्शनार्थत्वात्॥ ॥गोश्च पुरीषे॥ ॥गव्यमिति। गोरित्येतस्मादर्थविव
क्षायां सर्वत्र गो रजादि प्रसंगे यदिति यत्। नीतोपि प्रत्ययस्य लुगादेशः। पुरीषं न विकारो नाप्यवयव

इति प्रकृतत्वाद्गोरिति गम्यते। तत्र विकारस्तावन्न भवति प्रकृतेरवस्थान्तरं विकारः न च गोरवस्थां
तरं पुरीषं। गोधर्मानन्वयात्। नाप्यवयवप्रकारस्य समुदायैकदेशोऽवयवः। न कोऽवयवो भवति। यथाह
स्मादिशरीरस्य नत्वेवं गोः पुरीषं। कथं तर्हीदं विधानमित्यादि। तस्येदमित्यात् गवा तावित्वात्पु
रीषस्य। तत्तस्याः कार्यमिति तस्येदमर्थो भवति। तस्मात्तत्रैवेदं मयटो विधानं विकारावयवयो
स्तर्हि केन भवितव्यमित्याह। विकारावयवयोस्त्वित्यादि॥ ॥पिष्टा॥ ॥अणोपवाद इति पिष्ट
शब्दोऽयं निष्ठान्तत्वेनाद्युदात्तः। तेन तस्मादौत्सर्गिकः प्राप्नोति तत्तस्यायमपवादः॥ ॥
संज्ञायाम्॥ ॥मयटोपवाद इति। पूर्वसूत्रेण प्राप्तस्य। ननु च संज्ञायां कन्नेवच्छस्त्येव। तदपार्थ
कं तद्विधानं। नैतदस्ति। सत्यत्वादिष्यर्थे सर्वत्र विकारे। न त्विदं सार्थकमर्थान्तरे दानं॥ ॥असं॥
तिलयवशब्दौ स्वाद्युदात्तावेति। तस्मादण् प्राप्नोति। अतस्तस्यायमपवादः। आद्युदात्तत्वं तु। तयोस्तृणधा
न्यानां। द्व्यचामित्यनेनैव न भवितव्यं। अस्यायमर्थः। तृणधान्यानां द्व्यचामित्यादि। फिट्सूत्रेण भवति। यावक ३५

इति विकारेण। तदंतात्स्वार्थे वा दिभ्यः कनिति कन्॥ ॥नोत्व॥ ॥मौञ्जमिति। मुञ्जशब्दस्य पूर्ववदाद्युदात्त
त्वेन तस्मादौत्सर्गिक एवाण्। गार्मुतं इति। मुखोमात् इति प्रत्ययस्वरेण गर्मुच्छब्दोऽन्तोदात्तः। तस्मादनुदात्ता
दिश्चेत्यञ्। वार्ध्रीति। वर्धिरपिभ्यां अनवद्ध्रीशब्दो नित्स्वरेणाद्युदात्तः। तस्मादणि सतोऽण्। टिड्ढाणञिति
ङीप्। वैल्वमिति। बिल्वादिभ्योऽण्। अथ मद्उपनिर्देशः किमर्थः। ननोद्दर्द्धि बिल्वादिभ्यो नेत्यत आह
मद्उपनिर्देशादित्यादि। नोद्ध्रीबिल्वादिषु पठ्यमाने वर्णग्रहणं स्यात्। अत्र वर्णग्रहणे सर्वत्र
तदंतविधिं प्रयोजयतीति। तस्मात्तन्निषेधायमद्उपनिर्देशः। कः पुनस्तदंतविधौ सति दोषः स्यादि
त्यत आह। इहैवेत्यादि। एवकारेण मुञ्जादिभ्यो न स्यादिति दर्शयति। वैणवीति। बिल्वादित्वाद
ण्॥ ॥ताल॥ ॥मयडादीनामपवाद इति। आद्युदात्तश्चान्तः सततिभेदात्तयो बहुत्वस्य विवक्षि
तत्वाद्द्वयोरपि बहुवचनं। तत्र तालशब्दपामाकशब्दाभ्यां द्वलक्षणस्य मयटोऽपवादः। बर्हिणो वि
कारावयवावेतिप्राणिरजतादिभ्योऽनित्यनेन बर्हिणशब्दो विकारावयवप्रत्ययान्तः। तेन तस्मा

दं च्छिनश्च तत्प्रत्ययादिनिशाम्नस्यात्तोपवादः। शेषेप्यल्क इंद्रालिन्द्रादिभ्यो ऽनुदात्तादिर्लक्षणस्या
...लिशिष्टत्वाभ्यामिंद्र उपपदं कप्रकरणे मूलविभुजादिभ्य उपसंख्यानमिति कप्रत्ययः। अन्येषाम
...इत्यपन इति दीर्घत्वं णनिकारको पपदात्कृदिति स्वरेणांतोदात्तो विद्रालिन्द्रा इंद्राद् त्राणशब्दौ। इंद्रा
यु ऽत्राशब्दः समासस्वरेणांतोदात्तः। चपसंपतने। पचाद्यच्। पत्रशब्दो ऽन्तोदात्तः। पीयुक्षाशब्दो लघा
वंत इत्यादिनामध्योदात्तः। यद्यप्यस्य टापित्वेन लघावंते नास्ति प्राक्कटापो विद्यत एव। तस्यामेवावस्था
यांमध्योदात्तत्वं भवति। तालाद्धनुषीति फले। तालशब्दात् अण् प्रत्ययो भवति धनुष्यभिधेयइति। तालं
धनुः। तालमयमन्यत्। अथ तालग्रहणं किमर्थं नियथाविहितमेवोच्यते। नैवं शक्यं। वार्हिणशब्दात् दृ
लक्षणो मयट्प्रातिनश्च तत्प्रत्ययादित्यण्णा बाधितः। तत्पारे तत्सामर्थ्यान्मयडेवस्यात्। त्रपामाकशा
ब्दो लघावंत इत्यादिनामध्योदात्तादनुदात्तादेरञ्परत्वाद् द्वद्वलक्षणेन मयटा बाधित इति पुनरा
रंभसामर्थ्यादिञेवस्यात्। अणग्रहणं इलोवभवति॥ ॥जात॥ ॥बहुलवचननिर्देशादित्यादि ३९

पदिस्वरूपग्रहणमभीष्टं स्यात्। तस्य एकत्वादेकवचनेनैव निर्देशः क्रियेतेति भावः। मयडादीनामि
त्यादिनिर्देशेनाजोग्रहणं। बहुवचनं तु सर्वार्थं। तत्र ये वृद्धा हाटकजातरूपप्रभृतयस्तेभ्यो मयटोप
वादः। ये तु तपनीयप्रभृतयो ऽनुदात्तादयस्तेभ्यो ऽञः। तापनीयमिति। तपनीयशब्दो लघावंत इत्या
दिनामध्योदात्तः॥ ॥प्राणि॥ ॥अणादीनामपवाद इति। आदिशब्देन मयट्परिगृह्यते। बहुव
चनं तु सर्वार्थं। तत्र ये प्राणिशब्दा आद्युदात्तास्तेभ्यो ऽणोपवाद इति। ये तु वृद्धास्तेभ्यो मयट्परिगृ
ह्यते। रजतादिषु पियदाद्युदात्तं तस्मादणोपवादः। यत्पुनरनुदात्तादि तस्मान्मयटः। ततो ऽनुदा
त्तादेश्चेत्यनेनैवाञ्यसिद्धे पुनर्वचनमत्रैव यथा स्यात्। मयड्वैतयोरित्यादिना मयड्मा भूदिति
चमर्थं। तत्र रजतं घृतादिपाठदंतोदात्तं। सीसलोहेन त्विषयस्यानिसंतस्याद्युदात्तत्वं। अस्या
यमर्थः। नपुंसकविषयस्य शब्दस्य निमत्रस्यादिरुदात्तो भवति मनिनिन पुंसकस्यांत्यात्पूर्व
मित्यनुवर्त्तमाने शिष्टगौमीरोदुंबरबलिवर्दोष्ट्रारपुरुवमांचेति। उदुंबरे ऽयंस्यात्पूर्वमित्युरमनु

दान्तं।नीलदारुफरौहीतकविनीतकइत्येतेषांनघावंतइत्यादिनामध्योदात्तत्वं।पीनदारुशब्दमपि
केचित्पठंति।मनिर्द्विषयस्यानिसंनस्यइत्याद्युदात्तः।तस्तेत्विरितित्रिप्रत्ययांतत्वान्त्रित्शब्दस्य
प्रत्ययस्वरेणाद्युदात्तत्वं।त्रपःकंटकाअस्येतिबहुव्रीहिः।बहुव्रीहौप्रकृत्यापूर्वपदमितित्रिकंट
शब्दआद्युदात्तः।कंटंकरोतीतिकर्मण्यण्।कंटकारशब्दःकृत्स्वरेणांतोदात्तः॥ ॥ञितन॥ ॥मय
टोपवादइतिवृद्धलक्षणस्य।सर्वस्मिन्निप्रत्ययांतस्यबहुत्वात्।एतेप्रत्ययागृह्यंतइति।ननुचैकानु
बंधकपरिभाषयाञ्नोग्रहणंनप्राप्नोति।नैषदोषः।ञितश्चेतिहिचकारस्तसमुच्चयार्थः।तेनतस्या
पिग्रहणंनविष्यति।अपरञोग्रहणेनअनुदात्तादेश्चपलाशादिभ्योवेत्येतस्त्रविहितस्याञोग्रह
णंवेदितव्यं।अनित्यत्वात्।यएवयोरञित्यनेनाञ्विहितःसएवास्मिन्सूत्रेप्यनुवर्त्तते।देवदा
रवस्य।विकारोवयवोवेत्यादिनायथायोगमेषांप्रत्ययानामुदाहरणानिदर्शयति।कांस्यंपारस
वमिति।कंसायहितमिति।प्राक्क्रीताच्छः।कंसीयःपरशवेहितमिति।उगवादिभ्योयत्।परशव्यस्य ३७

विकारःअवयवोवेति।कंसीयपरशव्ययोर्यञ्ञोलुक्चेतियथासंख्यंयञ्ञोभवतः।छयतोश्च
लुक्।कांस्यंपारशवः।तयोर्विकारोवयवोवेति।अनेनाञ्।बैल्वमयमिति।बिल्वशब्दोबिल्वादिभ्यो
ऽणिति।अणंतः।ततोवृद्धलक्षणोमयडेवभवति।वैदमयमिति।अनुदात्तादिनाञ्।वैदः।नवत्ययमत
प्रत्ययोनित्यंवृद्धविकारावयवलक्षणस्तेनमयडेवभवति॥ ॥क्रीत॥ ॥अणादीनामपवादइति
आदिशब्देनाञादीनांग्रहणं।संख्यापिपरिमाणग्रहणेनगृह्यतइति।कथंपुनरेतदवगम्यते।यावता
परिमाणशब्दःप्रस्थादिषुरूढोनसंख्यायां।नैषदोषः।यथैवहिप्रस्थादिपरिच्छेदहेतुस्तथासंख्या
प्यतउपमानात्।संख्यायामपिपरिमाणशब्दोवर्त्तिष्यते।परिमाणमिवपरिमाणमिति।नन्वेवमु
ख्यमतिर्दिष्टंसंपद्यतेनेनदर्शयति।आदिशब्देनप्रकृत्यादिपरिग्रहः।द्विसहस्रमिति।गौणप्र
हणमयुक्तं।अयमदोषः।इहद्विनोत्रेण।द्वेपरिमाणशब्दावुच्चारितौ।तत्रद्वितीयंयदुपात्तंते
नसंख्यापिगृह्यते।नैष्किकमितिप्राग्वतेष्ठञ्।शत्यःशतिकंइति।शतानाच्चदंत्यतावचाने।साहस्रमि

नि। शतमानविंशतिकसहस्रवसनादण्। अध्यर्द्धपूर्वेत्यादिना। साहस्रपार्थवतो मतिपदिष्टं संप
द्यते न इत्ययिति। आदिशब्देन प्रत्ययादिपरिग्रहः। द्विसहस्रमिति। द्वयोः सहस्रयोर्विकार इति त
द्धितार्थे द्विगुः। प्राग्वतेः संख्यापूर्वपदानां तदंतविधिरलुकीति। तदंतविधेरनुज्ञानात्। यथा क्रीता
र्थे शतमानविंशतिकसहस्रवसनादिति द्विसहस्रादण् भवति तथा विकारेपि। तस्य च क्रीतार्थे वि
धाया कार्षापणसहस्राभ्यामिति पक्षे लुग्भवति। तथेहापि द्विसाहस्र इति। संख्यायाः संवत्सरपू
र्वस्येत्युत्तरपदवृद्धिः। द्विनिष्क इति। यथा क्रीतार्थे निष्कशब्दात्प्राग्वतेष्ठञ् भवति। तस्य द्वित्रिपूर्वा
न्निष्कादिति पक्षे लुक्। तथेहापि द्विनैष्किकमिति। परिमाणान्तस्यासंज्ञाशाणयोरिति उत्तरपदवृ
द्धिर्भवति॥ ॥उष्ट्रा॥ ॥उमो॥ ॥उमाशब्दस्तृणधान्यामित्यादिनाद्युदात्तः। ऊर्णाशब्दोपि प्राति
पदिकस्वरेणान्तोदात्तः। ताभ्यां यथासंख्यमणञोः प्राप्तयोर्विभाषा वुञ् आरभ्यते॥ ॥एण्या॥ ॥
पुंसस्तु नैव भवतीति। यदि तु पुंसो ढञ् स्यात् पुल्लिंगेनैव निर्देशं कुर्यादिति। पुल्लिंगेन हि निर्दे र्दे

शो यतिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणं भवतीति। एणीशब्दादपि प्रत्ययो भवत एव।
तस्मात्स्त्रीलिंगनिर्देशादेव पुंसोऽञ् भवति न ढञ्॥ ॥गोप॥ ॥मयड्विषयेऽत्र विधीयत इति॥
अञादिप्रसंग इति वचनात्। मयटोनेञादित्वात्तद्विषये न प्राप्नोतीत्यतः तत्र गोशब्दाद्विधीयते।
पयःशब्दस्तु पिबतेरसुन्प्रत्ययांतो नित्स्वरेणाद्युदात्तः। तस्मात्प्राग्दीव्यतोऽणित्यण् प्राप्नोति। अ
तस्तदपवादोऽयं यद्विधीयते॥ ॥फले॥ ॥तद्विषय इति विकारावयवविषये। आमलक इति॥
नित्यं वृद्धशरादिभ्य इति मयट्। तस्य लुक्। स्त्रीप्रत्ययस्य लुक् च भवति। ननु च फलं नेदं तस्य न वि
कारोऽप्यवयवः। विकारो हि द्विधा भवति। यो वा प्रकृतिं निगृह्णाति। खादिरं भस्मेति। यो वा प्रकृतिव्यप
देशं करोति। खादिरो यूप इति। न च फलं वृक्षमपगृह्णाति। नापि फलेन युक्तस्य व्यपदेशान्तरं भवति
अत आह। फलितस्य पादपस्य यथा पल्लवो न वृक्षमपगृह्णाति। नापि तस्य व्यपदेशान्तरं जनयत्यथ
च तस्य विकारस्तथा फलमिति। स्यादेतत्। अपत्यं विनावस्थां तस्यापगृह्णन्पल्लववदुपजायते

अतोयुक्तानस्यनद्विकारावयवत्वेतिफलमपितस्यफलिनावस्थांतरंहस्यापरःफलत्वमुपजायते।तस्या
पियुक्तएवनद्विकारभावः।यदप्यफलेनावयवेनारंभकत्वादिति।तदप्ययुक्तं।फलंस्वरूपमाश्रयमानंचा
स्वाद्यवयवसहायमन्यमेवविशिष्टंवृक्षावयवमारभते।नह्यथापत्रेवविशिष्टंसमुदायांतरमारभमा
णोवयवोनभवति।तथाफलमपीतिवेदितव्यं॥ ॥प्लक्षा॥ ॥अत्रोपवादइतितत्रेइत्युक्तेर्धुराशा
स्यामुवर्णंतिजहणस्यानोपवादः।शेषेभ्यस्तुअनुदात्तादिलक्षणस्य।सर्वेहितेनोदात्तत्वादनु
दात्तादयः।तत्रप्लक्षन्यग्रोधअश्वत्थशब्दाःप्रातिपदिकस्वरेणांतोदात्ताः।इङ्गुदीबृहतीशब्दौतुगौ
रादिङीषंतत्वात्प्रत्ययस्वरेणांतोदात्तौ।विधानसामर्थ्यादित्यादि।यद्यणोलुक्स्यात्तदावचनमनर्थ
कंस्यात्।नह्यणोवाञोवालुकिकृतेकश्चिद्विशेषोस्ति।नैयग्रोधमितिन्यग्रोधस्यचकेवलस्येति।ऐ
जागमः॥ ॥जंब्वा॥ ॥अनकृतेनवत्ययेवेति।तस्यहिलुकिसतिविधानमनर्थकंभवति।अश्रूयमाण
त्वात्।जंबूनीति।लुकिकृते।अभिधेयलिंगंनपुंसकंभवति।ह्रस्वोनपुंसकेप्रातिपदिकस्येति।अश्रा ३५

सोः।शिः।नुम्।नोपधायाइतिदीर्घः॥ ॥लुप्च॥ ॥कःपुनःलुपिसतिविशेषोयतोलुकिप्रकृतेसविधी
यतइत्यादि।युक्तवद्भावोविशेषइति।लुपिसतियुक्तवद्भावोभवति।लुपियुक्तवद्व्यक्तिवचनेइति
लुपिसत्येषविशेषइति।जंबूःफलमिति।अत्रयुक्तवद्भावेनप्रकृतिगतमेवलिंगंभवति।तेननपुंस
कलिंगंनप्रवर्त्तते।लुप्प्रकरणइत्यादि।फलपाकेनशुष्यतीतिफलपाकशुषः।अन्येभ्योपीतिदृश्यत
इतिक्विप्।व्रीहयोमुद्गाः।बिल्वादिभ्योण्।लुप्शयवामाषाइति।अतओत्सर्गिकस्याणः।एतेरणधा
न्यानामित्यादिनाआद्युदात्ताः।पुष्पमूलेषुबहुलमिति।पुष्पमूलेषुचाभिधेयेषुबहुलंलुप्
भवति।मल्लिका।नवमल्लिका।जातिर्विदारी।अंशुमती।बृहती।अत्रानुदात्तादिलक्षणस्याञो
लुप्।मल्लिकानवमल्लिकानवमल्लिकाशब्दौलघावंतेद्वयोश्चबह्वषोगुरुरितिमध्योदात्तौ।
जातिशब्दश्चक्तिच्क्तौचसंज्ञायामितिक्तिच्प्रत्ययांतत्वादंतोदात्तः।बदरीबृहतीशब्दावपि
गौरादिङीषंतत्वादंतोदात्तावेव।अंशुमतीशब्दस्तुगितश्चेतिङीबंतः।गुणेशब्दस्यप्रातिपदिक

स्वरेणांतोदात्तत्वात्मध्योदात्तः। पाटलानीति। बिल्वादित्वादण्। शाल्वानीत्यत्रानीति। माल्वानि। अनुदात्ता
दिलक्षणोऽत्र। शाल्वशब्दः प्रातिपदिकस्वरेणांतोदात्त इति। शाल्व इति शाक इति। यस्य प्रसिद्धिः। कश्चिदस्य
दर्शयति। लुपोन्यत्पुष्पविकार्यनिवृत्तिः। तस्य तु लुक् लुक्लुपोरनावश्यकत्वात् कदंबमित्यादावनुदात्तलक्षणस्या
ऽलुक् कादंबादयः शब्दाः लब्धा वनइत्यादिनामध्योदात्ताः। बैल्वानीति। अचो नयाभावः। बिल्वादिभ्योऽण्
एतन्नु सर्वे हरीतक्यादिपाठादेव सिद्धमिति। एवं विकल्पं हरीतक्यादिषु येषां च फलपाकनिमित्तः शोषः
पुष्पमूलेषु बहुलमिति पठ्यते॥ ॥हरीतक्यः॥ ॥हरीतक्यादिषु कंटकारिकाणार्गरिकाशेफालिकाइत्ये
ते संज्ञायां कन्निति कनंतत्वात् त्रिस्वरेण मध्योदात्ताः। ते नैव ते स्यऔत्सर्गिकस्याणो लुप्। शेषे त्यप्। अनुदा
त्तादिलक्षणस्यात्र। सर्वेहि तेऽन्तोदात्तत्वादनुदात्तादयः। तत्र कालाद्राक्षाद्रव्ये तेभ्यः प्राग्यपठ्यंते।
ते ङीषंतत्वादंतोदात्ताः। तत्र पाकी। अर्जुनपाकी इत्येतौ पाककर्णपर्णपुष्पादिना ङीषंतौ। शेषेभ्यः कंगो
रादित्वाङ्गौरादिभ्य इति। कालद्राक्षध्वाङ्क्षशब्देभ्यः प्रातिपदिकस्वरेणांतोदात्तेभ्यश्चपाप्सवर्णदीर्घ

त्वां। एकादेशउदात्तेनोदात्त इति उदात्तत्वं। अतः काळादयोऽप्यंतोदात्ताः॥ ॥कंसीया॥ ॥कंसी
य इति। उणादौ व्युत्पादितः शब्दः सप्रत्ययांतो कस्मादितः। परस्तु शब्दोऽपि कम्बुश्चेति। कृत इत्यनुवर्त्तमाने
त्याङ्परयोः श्वनिश्लेष्मो कृच्छ्रे इति। कृत्प्रत्ययांतः। ततस्तयोरपि धातुप्रत्यययोर्लुक् कस्मात्र भवतीत्या
ह। प्रातिपदिकाधिकारादित्यादि। प्रातिपदिकादिति वर्त्तते। तेन प्रातिपदिके यो विहितस्तस्य
लुक्प्रवर्तते। न चैतौ प्रातिपदिकाद्विहितौ। किं तर्हि धातोः। अतोऽनयोर्लुक् न प्रवर्त्तते। अनुदात्तत्वादे
वेति। परशब्दः शब्दो हि तित्स्वरितं इत्यंतस्वरितः। तेनानुदात्तादिरिति। इतीति। तत्र वर्त्तत इति यस्ये
ति चेत्यतः॥ ॥श्रीः॥ ॥इति श्रीबोधिसत्वदेशीयाचार्यजिनेन्द्रबुद्धिपादविरचितायां काशिका
विवरणपंजिकायां चतुर्थस्याध्यायस्य तृतीयः पादः समाप्तः॥ ॥श्रीः॥ ॥श्रीः॥ ॥श्रीः॥ ॥
संवत् १९४६ वर्षे प्रद्वितीयवैशाखमासे सितेतरे पक्षे तरे द्वितीयायां बुधवासरे प्रकाशीतनाबुधपुरनि
वासिना राजनगरस्थितेन नटजीवनेन लिखितश्चायं ग्रंथस्य तृतीयश्चरणः समाप्तिमगमत्॥ ॥